सगरः सागरः सार्थः समुद्रः समुद्रप्रियः।
समुद्रतीरसन्तुष्टः समुद्रप्रियदर्शनः ॥62॥

पाठांतर—1. वर्ण्यो 2. वन्धो 3. शकलः 4. सालसालि० 5. सदणुः 6. सेवाप्रियसदासनुः।

समुद्रेशः सरोनाथः सरसीज-विलोचनः।
सरसीजलदाकारः सरसीजलदार्चितः ॥63॥

समुद्रकः समुद्रात्माः साध्यमानः सुरेश्वरः।
सुरसेव्यः सुरेशानः सुरनाथः सुरार्चितः ॥64॥

सुराध्यक्षः सुराराध्यः सुरवन्द्यविशारदः।
सुरमुख्यः सुरप्रायः सुरसिन्धुनिवासवान् ॥65॥

सुधाप्रियः सुधाधीशः सुधाराध्यः सुधापतिः।
सुधानाथः सुधाभूतः सुधासागर-सेवितः ॥66॥

हाटको हीरको हन्ता हीरको रुचिरप्रभः।
हव्यावाहो हरिद्राभो हरिद्रारसदर्शनः ॥67॥

हेतिर्हेतुर्हरित्राता हरिनाथो हरिप्रियः।
हरिपूज्यो हरिप्राणो हरहृष्टो हरिद्रकः ॥68॥

हरीशो हन्तृको हीरो हरिनामपरायणः।
हरिमुग्धो हरिरम्यो हरिदासो हरीश्वरः ॥69॥

हरो हरपतिर्हारो हरिणीचित्तहारकः।
हरहीतो हरप्राणो हरविहन-शोभनः ॥70॥

हासो हासप्रियो हूहूर्हुतभुग् हुतवाहनः।[1]
हुताशनो हली हक्को हलाहल-हलायुधः ॥71॥

हलाकारो हलीशानो हलिपूज्यो हलिप्रियः।
हरपुत्रो हरोत्साहो हरसूनुर्हरात्मजः ॥72॥

हरवन्द्यो हराधीशो हरातङ्को हराकृतिः।
हरमान्यो हराङ्कस्थो हरवैरि-विनाशनः ॥73॥

हरशत्रुर्हरामर्षोऽहंकारो हरिणीप्रियः।
हाटकेशो हहेशानो हाटकप्रियदर्शनः ॥74॥

पाठांतर—1. यह पंक्ति कहीं नहीं भी है।

हाटको हाटक-प्राणो हाट्भूषणभूषितः ।
हेतिदो हंसको हंसो हंसगतिर्हराह्वयः ॥75॥

हंसीपतिर्हरोन्मत्तो हंसीशो हरवल्लभः ।
हरपुष्पप्रभो हंसीप्रियो हंसविलासकः ॥76॥

हरबीजरतो हारी हरितो हरिताम्पतिः ।
हरित्प्रभुर्हरित्पालो हरिदन्तरनायकः ॥77॥

हरिदीशो हरित्प्राणो हरप्रियः प्रियो हितः ।
हेरम्बो हुंकृति-क्रुद्धो हेरम्बानन्दनो हठी ॥78॥

हेरम्बप्राण-संहर्ता हेरम्ब-हृदयप्रियः
क्षमापतिः क्षणः क्षान्तः क्षुरधारः क्षितीश्वरः ॥79॥

क्षितीशः क्षिततिः क्षीणः क्षितिपालः क्षितिप्रभुः ।
क्षितीशानः क्षितिप्राणः क्षितिनायकसत्प्रियः ॥80॥

क्षितिराजः क्षणादाधीशः क्षणपतिः क्षणेश्वरः ।
क्षणप्रियः क्षमानायः क्षणदानायक-प्रियः ॥81॥

क्षणिकः क्षणदाधीशः क्षणदाप्राणदः क्षमी ।
क्षमः क्षोणिपतिः क्षोभः क्षोभकारी[1] क्षमाप्रियः ॥82॥

क्षमाशीलः क्षमारूपः क्षमामण्डनमण्डितः ।
क्षमानाथः क्षमाधारः क्षमाकारीः क्षमाकारः[2] ॥83॥

क्षामः क्षीणरजाः क्षुद्रः क्षद्रपान[3]-विशारदः ।
क्षुद्रेशानः[4] क्षणाकारः क्षीरपानकतत्परः ॥84॥

क्षीरशायी क्षणेशानः क्षोणिभृत्क्षणदोत्सवः ।
क्षेमङ्करः क्षमालुब्धः क्षमाशास्त्र-विशारदः ॥85॥

क्षमीश्वरः क्षमाकामः क्षमाहृदयमण्डनः ।
नीलाद्रिरुचिरोळेशो नीलपर्वत-सन्निभः ॥86॥

पाठांतर—1. क्षोभप्रदः 2. क्षमधारी क्षमाधरः 3. पालः 4. क्षुद्रासनः

नीलमणिप्रभारम्यः शशिभूषण-भूषितः।
[1]शशधरः शरीभूतो मुण्डमाला-विभूषितः ॥87॥

मुण्डस्थो मुण्ड-सन्तुष्टो मुण्डमालधरोऽनघः।
दिग्वासा विदिगाकारो दिगम्बरवरप्रदः ॥88॥

दिगम्बरीश आनन्दो दिगम्बर-तनूद्भवः।
पिङ्गलैकजटो धृष्टो डमरूवादनप्रियः ॥89॥

सृणीकरः सृणीशानः खड्गधृक् खड्गपालकः।
शूलहस्तो मतङ्गाभो मातङ्गोत्सवसुन्दरः ॥90॥

अभयङ्कर ऊर्वङ्गो लंकापति-विनाशनः।
नगाशयो नगेशानो नागमण्डल-मण्डितः ॥91॥

नगाकारो नगाधीशो नगशायी नगप्रियः।
घण्टोत्सवो घटाकारो घण्टावाद्य-विशारदः ॥92॥

कपालपाणिरम्बेशः कपालासनसारदः।[2]
पद्मपाणिः रालास्यस्त्रिनेत्रो नागवल्लभः ॥93॥

किङ्किणीजालसन्तुष्टो जलप्रायो जलाकरः।
अपमृत्युहरो मायामोहमूल-विनाशनः ॥94॥

आयुष्कः कमलानाथः कमलाकान्तवल्लभः।
राज्यदो राजराजेशो राजीवपद-शोभनः ॥95॥

डाकिनीनायको नित्यो नित्यधर्मपरायणः।
डाकिनीहृदयज्ञानी डाकिनीदेहनाशकः ॥96॥

डाकिनी-प्राणदः शुद्धः श्रद्धेयचरितो विभुः।
हेमप्रभो हिमेशानो हिमानीप्रियदर्शनः ॥97॥

हेमदो मर्मदो नामी नामधेयो नगात्मजः।
वैकुण्ठो वासुकिप्राणो वासुकी-कण्ठभूषणः ॥98॥

---

1. अन्यत्र यह पंक्ति नहीं है। पाठांतर—2. सादन.

कुण्डलीशो मखध्वंसी मखराजो मखेश्वरः।
मखाकारो मखाधीशो मखमाला-विभूषणः ॥99॥

अम्बिका वल्लभो वाणीपतिर्वाणी-विशारदः।
वाणीशो वाचः प्राणश्च वचनस्थो वन-प्रियः ॥100॥

वेलाधरो दिशामीशो दिङ्नागो हि दिगीश्वरः।
दूर्वाप्रियो दुराराध्यो दारिद्रय-भयभञ्जनः[1] ॥101॥

तर्कस्तर्कप्रियस्तर्क्यो वितर्क्कस्तर्कवल्लभः।
तर्कसिद्धोऽतिसिद्धात्मा सिद्धदेहो गुहाशयः ॥102॥

ग्रहगर्भो ग्रहेशानो गन्धगन्धो विशारदः।
मङ्गलो मङ्गलाकारो मङ्गलवाद्य-वादकः ॥103॥

मङ्गलीशो विमानस्थो विमानो नैकनायकः[2]।
बुधेशो विबुधाधीशो बुधवारो बुधाकरः ॥104॥

बुधनाथो बुधप्रीतो बुधवन्द्यो बुधाधिपः।
बुधसिद्धो बुधप्राणो बुद्धबुद्धो बुधप्रियः ॥105॥

सोमप्रभो मनःसिद्धो मनोज-प्राणनाशनः।
सामेशो मशकाकारो सोमपाः सोमनायकः ॥106॥

कामगः कामहा बौद्धः कामनाफलदोऽधिपः।
त्रिदंशो दशरात्रेशो दशानन-विनाशनः ॥107॥

लक्ष्मणो लक्ष्यसम्भर्त्ता[3]लक्ष्यसंख्यो मनःप्रियः।
विभावसुर्नलेशानो नायको नगजाप्रियः ॥108॥

नलकान्तिर्नलोत्साहो नरदेवो नराकृतिः।
नरपतिर्नरेशानो नारायणो नरेश्वरः ॥109॥

अनिलो मारुतो मांसो मांसैकरससेवितः।
मरीचिरमरेशानो मागधो मगधप्रभुः ॥110॥

पाठांतर—1. दारिद्रयभञ्जन क्षमः 2. विमानस्यैकनायकः 3. लक्षसंवर्त्ति

सुन्दरो सेवकोद्वारी द्वारदेशनिवासनः ।
देवकीगर्भसञ्जातो देवकी-सेवकः कुजः[1] ॥111॥

वृहस्पतिः कविः शुक्रः शारदासाधकप्रियः ।
शारदासाधकः प्राणः शारदासेवकोत्सुकः ॥112॥

शारदासाधक-श्रेष्ठो वीतरागो जगत्प्रभुः ।
मांसप्रियो मधुप्राणो मधुमास-महोत्सवः ॥113॥

मधुपो मधुपश्रेष्ठो मधुपानसदारतिः ।
मोदकादान-सम्प्रीतो मोदकामोदमोहितः ॥114॥

आमोदानन्दितो नन्दो नन्दिकेशो नदेश्वरः ।
नदीप्रियो नदीनाथो नदीतीररुहस्तपाः ॥115॥

तपनस्तापनस्तप्ता[2] तापहा तापकारकः ।
पतङ्गो गोमुखो गौरो गोपालो गोपवर्द्धनः ॥116॥

गोपतिर्गोपसंहर्ता गोवृन्दैकप्रियोऽतिगः ।
गर्विष्ठो गुणरम्यश्च गुणसिन्धुर्गुरुप्रियः ॥117॥

गुणपूज्यो गुणोपेतो गुणवाद्यो गुणोत्सुकः ।
गुणीशः केवलो गर्भः सुगर्भो गर्भरक्षकः ॥118॥

गाम्भीर्यधारको धर्त्ता विधर्ता धर्मपालकः ।
जगदीशो जगन्मित्रो जगत्त्राता जगत्प्रभुः[3] ॥119॥

जगद्धाता जगद्भोक्ता जगज्जाड्य विनाशनः !
जगत्कर्ता जगद्धर्ता जगज्जीवन-जीवनः ॥120॥

मालतीपुष्प-सम्प्रीतो मालती-कुसुमोत्सुकः ।
मालतीकुसुमाकारो मालती-कुसुमप्रभः ॥121॥

रसालमञ्जरीरम्यो रसगन्ध-निषेवितः ।[4]
रसालमञ्जरीलुब्धो रसालतरूवल्लभः । ॥122॥

पाठांतर—1. कुहूः 2. तफ्र 3. जगत्प्रियः 4. यह अर्धश्लोक नहीं है।

रसालतरुवासी वै रसालफलसुन्दरः।
रसालरससन्तुष्टो रसालरसलालसः[1] ॥123॥

केतकी-पुष्पसन्तुष्टो केतकीगर्भसम्भवः।
केतकीपत्र-संकाशः केतकी-प्राणनाशनः ॥124॥

गर्त्तस्थो गर्त्तगम्भीरो गर्त्तेशो गर्त्तनायकः।
गर्त्तगेशोऽतिगर्त्तस्थो गर्त्ततीरनिवासकः ॥125॥

गणसेव्यो गणाध्यक्षो गणराजो गणाह्वयः।
आनन्दभैरवो भीरुर्भैरवेशो रुरुर्भगः ॥126॥

सुब्रह्मभैरवो वामभैरवो भूतभावनः।
भैरवी-तनयो देवीपुत्रः पर्वतसम्भवः ॥127॥

यहां तक श्री बटुकभैरव के सहस्रनाम कहे गए हैं। इसके पश्चात इस 'श्री-बटुकभैरव-सहस्रनाम' के स्रोत के पाठ का फल कहा जाता है–

नाम्नाऽनेन सहस्रेण स्तुत्वा बटुकभैरवम्।
लभते ह्यतुलां लक्ष्मीं देवानामपि दुर्लभाम् ॥128॥

उपदेशं गुरोर्लब्ध्वा योगे त्रिमंगली भवेत्।
अष्टम्यां वा चतुर्दश्यां वासरे भूमिसम्भवे ॥129॥

शुक्रे वा रविसंक्रांतौ योगोऽयमुत्तमः प्रभो।
तस्मिन् योगे महेशानि सर्वसिद्धिमवाप्नुयात् ॥130॥

लक्षमावर्त्तयेन्मन्त्री मन्त्रराजं नगेश्वरि।
नित्यकर्म सुसिद्ध्यर्थं तत्फलं लभते ध्रुवम् ॥131॥

स्तवमेनं-पठेन्मन्त्री पाठयन् वा यथाविधि।
दुर्लभां लभते सिद्धिं सर्वदेव-नमस्कृताम् ॥132॥

न प्रकाश्यं च पुत्रेषु भ्रष्टेषु तु कदाचन।
अन्यथा सिद्धिरोधः स्याद् वातुलो वा भवेत्प्रियः ॥133॥

पाठांतर–1. गन्ध-लालसः

स्तवस्यास्य प्रसादेन देवनायकवत्प्रियः।
सङ्ग्रामे विजयेच्छत्रून्मातङ्गानिव केसरी ॥134॥

राजानं वशयेत् सद्यो देवानपि वशं नयेत्।
किं वा परं फलं नाथ! स्तवराजस्य कथ्यताम् ॥135॥

यद्यन्मनसि सङ्कल्प स्तवमेनमुदीरयन्।
तत्तदाप्नोति देवेश बटुकस्य प्रसादतः ॥136॥

आपदां हि विनाशाय कारणं कान्त-दुर्लभम्।
देवासुररणे घोरे देवानामुपकारकम् ॥137॥

प्रकाशितं मया नाथ तन्त्रे भैरवदीपके।
अपुत्रो लभते पुत्रं षण्मासान् निरतो नरः ॥138॥

पठित्वा पाठयित्वाऽपि स्तवराजमनुत्तमम्।
दरिद्रो लभते लक्ष्मीमीप्सितामपि निश्चलाम् ॥139॥

कन्यार्थी लभते कन्यां सर्वरूपसमन्विताम्।
प्रदोषे बलिदाने च वशयेदखिलं जगत् ॥140॥

वटे वा बिल्वमूले वा रम्भायां विपनेऽपि वा।
जपेत्सततमालक्षं मन्त्रराजस्य सिद्धये ॥141॥

वर्णलक्षं जपेद्वापि दिङ्मात्रं हि प्रदर्शितम्
पूजयेत्तु तिलैर्माषैर्दुग्धैर्मांसैर्झषैस्तथा ॥142॥

घृतपक्वान्नतो वाऽपि जेमनै रससंकुलैः।
पूजयेद्धारयेद् वाऽपि स्तवमेनं सुसाधकः ॥143॥

पठेद् वा पाठयेद् वाऽपि यथाविधि सुरप्रिये।
शत्रुतो न भयं तस्य नाग्निचोरास्त्रवज्रजम् ॥144॥

ज्वरादिसम्भवं वापि सत्यं सत्यं महेश्वरि।
भैरवाराधनाशक्तो यो भवेत्साधकः प्रभो ॥145॥

सदाशिवः स विज्ञयो भैरवेणेति भाषितम् ॥146॥
श्रीमद्भैरवराजरञ्जनविधौ वैय्यग्रमासेदुषः।

पुंसः पञ्चविधा भवन्ति नवधा ह्यष्टौ तथा सिद्धयः।
क्षोणीपाल-किरीट-कोटिमणिरुन्मालाभरैर्भूयशो-
मौग्ध्यं पादपयोजयोर्विजयते मूर्ध्नि प्रभोश्छत्रताम् ॥147॥

जो व्यक्ति इस श्रीबटुकभैरव सहस्रनाम स्रोत का यथाविधि पाठ करता है, वह दुर्लभ सिद्धियां पा लेता है। यह स्रोत कुपात्र को नहीं बताना चाहिए। वट, बिल्व अथवा केले के वृक्ष के नीचे बैठकर अथवा वन में जाकर जो व्यक्ति इस स्रोत का निरन्तर एक लाख की संख्या में जप करता है उसे यह मन्त्रराज सिद्ध हो जाता है और उसकी समस्त मनोकामनाएं पूर्ण होती हैं।

इति श्रीभैरवन्त्रोक्तं श्रीबटुकभैरवसहस्रनामस्तोत्रं समाप्तम्

प्रातःपठनीय श्रीबटुक भैरव के भयनाशक दसनाम

कपाली कुण्डली भीमो भैरवो भीमविक्रमः।
व्यालोपवीती कवची शूली शूरः शिवप्रियः॥
एतानि दशनामानि प्रातरुत्थाय यः पठेत्।
भैरवी-यातना न स्याद् भयं क्वापि न जायते॥

इन दस नामों से पूजा और नमस्कार भी किया जाता है तदर्थ इस प्रकार बोलें—

1. ॐ ह्रीं कपालिने नमः।
2. ॐ ह्रीं कुण्डलिने नमः।
3. ॐ ह्रीं भीमाय नमः।
4. ॐ ह्रीं भैरवाय नमः।
5. ॐ ह्रीं भीमविक्रमाय नमः।
6. ॐ ह्रीं व्यालोपवीतिने नमः।
7. ॐ ह्रीं कवचिने नमः।
8. ॐ ह्रीं शूलिने नमः।
9. ॐ ह्रीं शूसय नमः।
10. ॐ ह्रीं शिवप्रियाय नमः।

प्रतिनाम-नमस्कार-युतं 'रुद्रयामल'-प्रोक्तं श्रीबटुक-भैरव-सहस्रनाम-स्तोत्रम्

वैसे तो भगवान् बटुकभैरव के अनेक सहस्रमान भिन्न-भिन्न आगम, तन्त्र और यामलों में निर्दिष्ट हैं, किन्तु उनमें रुद्रयामल में दर्शित यह सहस्रनाम अत्यन्त महत्वपूर्ण है। साथ ही यह पूर्वोक्त **'आपदुद्धारक-बटुक-भैरव-स्रोत-रूप अष्टोत्तर-शतनामावली'**–(जो कि रुद्रयामल के अनुसार ही है, अतः उस)–के नामों से भी ओतप्रोत है। सम्भवतः वह नामावली इसी सहस्रनाम से साररूप में संगृहीत है। इसके अतिरिक्त इस सहस्रनाम की एक और विशेषता यह है कि–इसमें भक्ति-पूर्वक प्रायः प्रत्येक नाम के साथ चतुर्थी विभक्ति अथवा सम्बोधन-पूर्वक नमस्कार का भी समन्वय हुआ है। बीच-बीच में **नमो भैरवरूपाय भैरवाय नमो नमः** इस अर्धाली के द्वारा विशेष रूप से नमन भी किया गया है। अतः इसका पाठ करके इष्टदेव की कृपा प्राप्त करनी चाहिए।

ॐ नमो भैरवरूपाय भैरवाय नमो नमः।
नमो भद्रस्वरूपाय जगदाद्य नमो नमः ॥1॥

नमः कल्पस्वरूपाय विकल्पाय नमो नमः।
नमः शुद्धस्वरूपाय सुप्रकाशाय ते नमः ॥2॥

नमः क्रङ्कालरूपाय कालरूप नमोऽस्तु ते।
नमस्त्र्यम्बरूपाय महाकालाय ते नमः ॥3॥

नमः संसारसाराय शारदाय नमो नमः।
नमो भैरवरूपाय भैरवाय नमो नमः ॥4॥

नमः क्षेत्रनिवासाय क्षेत्रपालाय ते नमः।
क्षेत्रक्षेत्रस्वरूपाय क्षेत्रकर्त्रे नमो नमः ॥5॥

नमो नागविनाशाय भैरवाय नमो नमः।
नमो मातङ्गरूपाय भारतरूप नमोऽस्तु ते ॥6॥

नमः सिद्धस्वरूपाय सिद्धिदाय नमो नमः।
नमो विन्दुस्वरूपाय विन्दुसिन्धुप्रकाशिने ॥7॥

नमो मङ्गलरूपाय मालवाय नमो नमः।
नमः सङ्कटनाशाय शङ्कराय नमो नमः ॥8॥

नमो धर्मस्वरूपाय धर्मदाय नमो नमः।
नमोऽनन्तस्वरूपाय एकरूप नमोऽस्तुते ॥9॥

नमो वृद्धिस्वरूपाय वृद्धिकार नमोऽस्तुते।
नमो मोहनरूपाय मोक्षरूपाय ते नमः ॥10॥

नमो जलदरूपाय सामरूप नमोऽस्तु ते।
नमः स्थूलस्वरूपाय शुद्धरूपाय ते नमः ॥11॥

नमो नीलस्वरूपाय रङ्गरूपाय ते नमः।
नमो मण्डलरूपाय मण्डलाय नमो नमः ॥12॥

नमो रुद्रस्वरूपाय रुद्रनाथाय ते नमः।
नमो ब्रह्मस्वरूपाय ब्रह्मवक्त्रे ते नमः ॥13॥

नमस्त्रिशूलधाराय धाराधारिन्नमोऽस्तु ते।
नमः संसारबीजाय विरूपाय नमो नमः ॥14॥

नमो विमलरूपाय भैरवाय नमो नमः।
नमो जङ्गमरूपाय जलजाय नमो नमः ॥15॥

नमः कालस्वरूपाय कालरुद्राय ते नमः।
नमो भैरवरूपाय भैरवाय नमो नमः ॥16॥

नमः शत्रुविनाशाय भीषणाय नमो नमः।
नमः शान्ताय दान्ताय भ्रमरूप नमोऽस्तु ते ॥17॥

न्यायगम्याय शुद्धाय योगिध्येयाय ते नमः।
नमः कमलकान्ताय कालवृद्धाय ते नमः ॥18॥

नमो ज्योतिःस्वरूपाय सुप्रकाशाय ते नमः।
नमः कल्पस्वरूपाय भैरवाय नमो नमः ॥19॥

नमो जयस्वरूपाय जगज्जाड्य-निवारिणे।
महाभूताय भूताय भूतानां पतये नमः ॥20॥

नमो नन्दाय वृन्दाय वादिने ब्रह्मवादिने।
नमो वादस्वरूपाय न्यायगम्याय ते नमः ॥21॥

नमो भवस्वरूपाय मायानिर्माणरूपिणे।
विश्ववन्द्याय वन्द्याय नमो विश्वम्भराय ते ॥22॥

नमो नेत्रस्वरूपाय नेत्ररूपिन्नमोऽस्तु ते।
नमो वरुणरूपाय भैरवाय नमो नमः ॥23॥

नमो यमस्वरूपाय वृद्धरूपाय ते नमः।
नमः कुबेररूपाय कालनाथाय ते नमः ॥24॥

नमः ईशानरूपाय अग्निरूपाय ते नमः।
नमो वायुस्वरूपाय विश्वरूपाय ते नमः ॥25॥

नमः प्राणस्वरूपाय प्राणाधिपतये नमः।
नमः संहाररूपाय पालकाय नमो नमः ॥26॥

नमश्चन्द्रस्वरूपाय चण्डरूपाय ते नमः।
नमो मन्दरवासाय वासिने सर्वयोगिनाम् ॥27॥

योगिगम्याय योग्याय योगिनां पतये नमः।
नमो जङ्गमवासाय वामदेवाय ते नमः ॥28॥

नमः शत्रु-विनाशाय नीलकण्ठाय ते नमः।
नमो भक्ति-विनोदाय दुर्भगाय नमो नमः ॥29॥

नमो मान्यस्वरूपाय मानदाय नमो नमः।
नमो भूतिविभूषाय भूतिषाय नमो नमः ॥30॥

नमो रजःस्वरूपाय सात्त्विकाय नमो नमः।
नमस्तामसरूपाय तारणाय नमो नमः ॥31॥

नमो गङ्गाविनोदाय जयसन्धारिणे नमः।
नमो भैरवरूपाय भीषणाय नमो नमः ॥32॥

नमः सङ्ग्रामरूपाय सङ्ग्रामजयदायिने।
सङ्ग्रामसाररूपाय पावनाय नमो नमः ॥33॥

नमो वृद्धिस्वरूपाय वृद्धिदाय नमो नमः।
नमस्त्रिशूलहस्ताय शूलसंहारिणे नमः ॥34॥

नमो द्वन्द्वस्वरूपाय रूपदाय नमो नमः।
नमः शत्रुविनाशाय शत्रुबुद्धिविनाशिने ॥35॥

महाकालाय कालाय कालनाथाय ते नमः।
नमो भैरवरूपाय भैरवाय नमो नमः ॥36॥

नमः शुभस्वरूपाय शम्भुरूपिन्नमोऽस्तु ते।
नमः कमलहस्ताय डमरुहस्ताय ते नमः ॥37॥

नमः कुक्कुरवाहाय वहनाय नमो नमः।
नमो विमलनेत्राय त्रिनेत्राय नमो नमः ॥38॥

नमः संसाररूपाय सारमेयाय वाहिने।
संसारज्ञानरूपाय ज्ञाननाथाय ते नमः ॥39॥

नमो मङ्गलरूपाय मङ्गलाय नमो नमः।
नमो न्यायविशालाय मन्त्ररूपाय ते नमः ॥40॥

नमो यन्त्रस्वरूपाय यन्त्रधारिन्नमोऽस्तु ते।
नमो भैरवरूपाय भैरवाय नमो नमः ॥41॥

नमः कलङ्करूपाय कलङ्काय नमो नमः।
नमः संसारपाराय भैरवाय नमो नमः ॥42॥

रुण्डमालाविभूषाय भीषणाय नमो नमः।
नमो दुःखनिवाराय विहराय नमो नमः ॥43॥

नमो दण्डस्वरूपाय क्षणरूपाय ते नमः।
नमो मुहूर्तरूपाय सर्वरूपाय ते नमः ॥44॥

नमो मोदस्वरूपाय श्रोत्ररूपाय ते नमः।
नमो नक्षत्ररूपाय क्षेत्ररूपाय ते नमः ॥45॥

नमो विष्णुस्वरूपाय बिन्दुरूपाय ते नमः।
नमो ब्रह्मस्वरूपाय ब्रह्मचारिन्नमोऽस्तु ते ॥46॥

नमः कन्थानिवासाय पटवासाय ते नमः।
नमो ज्वलनरूपाय ज्वलनाय नमो नमः ॥47॥

नमो बटुकरूपाय धूर्तरूपाय ते नमः।
नमो भैरवरूपाय भैरवाय नमो नमः ॥48॥

नमो वैद्यस्वरूपाय वैद्यरूपिन्नमोऽस्तु ते।
नमः औषधरूपाय औषधाय नमो नमः ॥49॥

नमो व्याधिनिवाराय व्याधिरूपिन्नमोनमः।
नमो द्वारनिवाराय ज्वररूपाय ते नमः ॥50॥

नमो रुद्रस्वरूपाय रुद्राणां पतये नमः।
विरूपाक्षाय देवाय भैरवाय नमो नमः ॥51॥

नमो ग्रहस्वरूपाया ग्रहाणां पतये नमः।
नमः पवित्रधाराय पर्शुधाराय ते नमः ॥52॥

यज्ञोपवीतदेवाय देवदेव नमोऽस्तुते।
नमो यज्ञस्वरूपाय यज्ञानां फलदायिने ॥53॥

नमो रणप्रतापाय तापनाय नमो नमः।
नमो गणेशरूपाय गणरूपाय ते नमः ॥54॥

नमो रश्मिस्वरूपाय रश्मिरूपाय ते नमः।
नमो मलयरूपाय रश्मिरूपाय ते नमः ॥55॥

नमो विभक्तिरूपाय विमलाय नमो नमः।
नमो मधुररूपाय माधिपूर्णकलापिने ॥56॥

कालेश्वराय कालाय कालनाथाय ते नमः।
नमो विश्वप्रकाशाय भैरवाय नमो नमः ॥57॥

नमो योनिस्वरूपाय मातृरूपाय ते नमः।
नमो भगिनीरूपाय भैरवाय नमो नमः ॥58॥

नमो वृषस्वरूपाय कर्मरूपाय ते नमः।
नमो वेदान्तवेद्याय वेदसिद्धान्तसारिणे ॥59॥

नमः शाखाप्रकाशाय पुरुषाय नमो नमः।
नमः प्रकृतिरूपाय भैरवाय नमो नमः ॥60॥

नमो विश्वस्वरूपाय शिवरूपाय ते नमः।
नमो ज्योतिःस्वरूपाय निर्गुणाय नमो नमः ॥61॥

निरञ्जनाय शान्ताय निर्विकाराय ते नमः।
निर्ममाय विमोहाय त्रिभुवनाथाय ते नमः ॥62॥

नमः कण्ठप्रकाशाय शत्रुनाथाय ते नमः।
नमः आशाप्रकाशाय आशापूरकृते नमः ॥63॥

नमो मत्स्यस्वरूपाय योगरूपाय ते नमः।
नमो वाराहरूपाय वामनाय नमो नमः ॥64॥

नमः आनन्दरूपाय आनन्दाय नमो नमः।
नमोऽस्त्वनर्घकेशाय ज्वलत्केशाय ते नमः ॥65॥

नमः पापविमोक्षाय मोक्षाय च नमो नमः।
नमः कैलाशनाथाय कालनाथाय ते नमः ॥66॥

नमो बिन्दुदबिन्दाय बिन्दुभाय नमो नमः।
नमः प्रणवरूपाय भैरवाय नमो नमः ॥67॥

नमो मेरुनिवासाय रक्तवासाय ते नमः।
नमो मेरुस्वरूपाय भैरवाय नमो नमः ॥68॥

नमो भद्रस्वरूपाय भद्ररूपाय ते नमः।
नमो योगिस्वरूपाय योगिनां पतये नमः ॥69॥

नमो मन्त्रस्वरूपाय मित्ररूपाय ते नमः।
नमो ब्रह्मनिवासाय काशीनाथाय ते नमः ॥70॥

नमो ब्रह्माण्डवासाय ब्रह्मवासाय ते नमः।
नमो मातङ्गवासाय सूक्ष्मवासाय ते नमः ॥71॥

नमो मातृनिवासाय भ्रातृवासाय ते नमः।
नमो जगन्निवासाय जलावासाय ते नमः ॥72॥

नमः कौलनिवासाय नेत्रवासाय ते नमः ।
नमो भैरववासाय भैरवाय नमो नमः ॥73॥

नमः समुद्रवासाय वह्निवासाय ते नमः ।
नमश्चन्द्रनिवासाय चन्द्रावासाय ते नमः ॥74॥

नमः कलिङ्गवासाय कलिङ्गाय नमो नमः ।
नमः उत्कलवासाय इन्द्रवासाय ते नमः ॥75॥

नमः कर्पूरवासाय सिद्धिवासाय ते नमः ।
नमः सुन्दर-वाय्यास भैरवाय नमो नमः ॥76॥

नमः आकाशवासाय वासिने सर्वयोगिनाम् ।
नमो ब्राह्मणवासाय शूद्रवासाय ते नमः ॥77॥

नमः क्षत्रियावासाय वैश्यवासाय ते नमः ।
नमः पक्षिनिवासाय भैरवाय नमो नमः ॥78॥

नमः पातालमूलाय मूलावासाय ते नमः ।
नमो रसातलवासाय सर्वपातालवासिने ॥79॥

नमः कङ्कालवासाय कङ्कवासाय ते नमः ।
नमो मन्त्रनिवासाय भैरवाय नमो नमः ॥80॥

नमोऽहङ्काररूपाय रजोरूपाय ते नमः ।
नमः सत्त्वनिवासाय भैरवाय नमो नमः ॥81॥

नमो नलिनरूपाय नलिनाङ्गप्रकाशिने ।
नमः सूर्यस्वरूपाय भैरवाय नमो नमः ॥82॥

नमो दुष्टनिवासाय साधूपायस्वरूपिणे ।
नमो नम्रस्वरूपाय स्तम्भनाय नमो नमः ॥83॥

पञ्चयोनिप्रकाशाय चतुर्योनिप्रकाशिने ।
नवयोनिप्रकाशाय भैरवाय नमो नमः ॥84॥

नमः षोडशरूपाय नमः षोडशधारिणे ।
चतुःषष्टिप्रकाशाय भैरवाय नमो नमः ॥85॥

नमो बिन्दुप्रकाशाय सुप्रकाशाय ते नमः।
नमो गणस्वरूपाय सुखरूप नमोऽस्तुते ॥86॥

नमोऽम्बरस्वरूपाय भैरवाय नमो नमः।
नमो नानास्वरूपाय मुखरूप नमोऽस्तुते ॥87॥

नमो दुर्गस्वरूपाय दुःखहन्त्रे नमोऽस्तुते।
नमो विशुद्धदेहाय दिव्यदेहाय ते नमः ॥88॥

नमो भैरवरूपाय भैरवाय नमो नमः।
नमः प्रेतनिवासाय पिशाचाय नमो नमः ॥89॥

नमो निशाप्रकाशाय निशारूप नमोऽस्तुते।
नमः सोमार्धरामाय धराधीशाय ते नमः ॥90॥

नमः संसारभाराय भारकाय नमो नमः।
नमो देहस्वरूपाय अदेहाय नमो नमः ॥91॥

देवदेहाय देवाय भैरवाय नमो नमः।
विश्वेश्वराय विश्वाय विश्वधारिन्नमोऽस्तु ते ॥92॥

स्वप्रकाशप्रकाशाय भैरवाय नमो नमः।
स्थितिरूपाय स्थित्याय स्थितीनां पतये नमः ॥93॥

सुस्थिराय सुकेशाय केशवाय नमो नमः।
स्थविष्ठाय गरिष्ठाय प्रेष्ठाय परमात्मने ॥94॥

नमो भैरवरूपाय भैरवाय नमो नमः।
नमः पारदरूपाय पवित्राय नमो नमः ॥95॥

नमो वेधकरूपाय अनिन्दाय नमो नमः।
नमः शब्दस्वरूपाय शब्दातीताय ते नमः ॥96॥

नमो भैरवरूपाय भैरवाय नमो नमः।
नमो निन्दास्वरूपाय अनिन्दाय नमो नमः ॥97॥

नमो विष्णुस्वरूपाय भैरवाय नमो नमः।
नमः शरण्यशरण शरण्यानां सुखाय ते ॥98॥

नमो शरण्यरक्षाय भैरवाय नमो नमः।
नमः स्वाहास्वरूपाय स्वधारूपाय ते नमः ॥99॥

नमो वौषट्स्वरूपाय भैरवाय नमो नमः।
अक्षराय नमस्तुभ्यं त्रिधामात्रास्वरूपिणे ॥100॥

नमोऽक्षराय शुद्धाय भैरवाय नमो नमः।
अर्धमात्राय पूर्णाम पूर्णाय ते नमो नमः ॥101॥

नमो भैरवरूपाय भैरवाय नमो नमः।
नमोऽष्टचक्ररूपाय ब्रह्मरूपाय ते नमः ॥102॥

नमो भैरवरूपाय भैरवाय नमो नमः।
नमः सृष्टिस्वरूपाय सृष्टिकर्त्रे महात्मने ॥103॥

नमः पाल्यस्वरूपाय भैरवाय नमो नमः।
सनातनाय नित्याय निर्गुणाय गुणाय ते ॥104॥

नमः सिद्धाय शान्ताय भैरवाय नमो नमः।
नमो धारास्वरूपाय खड्ग हस्ताय ते नमः ॥105॥

नमस्त्रिशूलहस्ताय भैरवाय नमो नमः।
नमः कुण्डलवर्णाय शवमुण्डविभूषिणे ॥106॥

महाक्रुद्धाय चण्डाय भैरवाय नमो नमः।
नमो वासुकिभूषाय सर्पभूषाय ते नमः ॥107॥

नमः कपालहस्ताय भैरवाय नमो नमः।
पानपात्रप्रमत्ताय मत्तरूपाय ते नमः ॥108॥

नमो भैरवरूपाय भैरवाय नमो नमः।
नमो माधवरूपाय माधवाय नमो नमः ॥109॥

नमो माङ्गल्यरूपाय भैरवाय नमो नमः।
नमः कुमाररूपाय स्त्रीरूपाय नमो नमः ॥110॥

नमो गन्धस्वरूपाय भैरवाय नमो नमः।
नमो दुर्गन्धरूपाय सुगन्धाय नमो नमः ॥111॥

नमः पुष्पस्वरूपाय पुष्पभूषण ते नमः।
नमः पुष्पप्रकाशाय भैरवाय नमो नमः ॥112॥

नमः पुष्पविनोदाय पुष्पपूजाय ते नमः।
नमो भक्तिनिवासाय भक्तदुःखनिवारिणे ॥113॥

भक्तप्रियाय शान्ताय भैरवाय नमो नमः।
नमो भक्तस्वरूपाय रूपदाय नमो नमः ॥114॥

नमो भैरवरूपाय भैरवाय नमो नमः।
नमो वासाय भद्राय वीरभद्राय ते नमः ॥115॥

नमः संग्रामसाराय भैरवाय नमो नमः।
नमः खट्वाङ्गहस्ताय कालहस्ताय ते नमः ॥116॥

नमऽघोराय घोराय घोराघोरस्वरूपिणे।
घोरघर्माय घोराय भैरवाय नमो नमः ॥117॥

घोरत्रिशूलहस्ताय घोरपानाय ते नमः।
घोररूपाय नीलाय भैरवाय नमो नमः ॥118॥

घोरवाहनगम्याय अगम्याय नमो नमः।
घोरब्रह्मस्वरूपाय भैरवाय नमो नमः ॥119॥

घोरशब्दाय घोराय घोरदेहाय ते नमः।
घोरद्रव्याय घोराय भैरवाय नमो नमः ॥120॥

घोरसङ्गाय सिंहाय सिद्धसिंहाय ते नमः।
नमः प्रचण्डसिंहाय सिंहरूपाय ते नमः ॥121॥

नमः सिंहप्रकाशाय सुप्रकाशाय ते नमः।
नमो वियजरूपाय जगदाद्य नमो नमः ॥122॥

नमो भार्गवरूपाय गर्भरूपाय ते नमः।
नमो भैरवरूपाय भैरवाय नमो नमः ॥123॥

नमो मेध्याय शुद्धाय मायाधीशाय ते नमः।
नमो मेघप्रकाशाय भैरवाय नमो नमः ॥124॥

दुर्ज्ञेयाय दुरन्ताय दुर्लभाय दुरात्मने।
भक्तिलभ्याय भव्याय भविताय नमो नमः ॥125॥

नमो गौरवरूपाय गौरवाय नमो नमः
नमो भैरवरूपाय भैरवाय नमो नमः ॥126॥

नमो विघ्ननिवाराय विघ्नराशिन्नमोऽस्तुते।
नमो विघ्नविदाराय भैरवाय नमो नमः ॥127॥

नमः किंशुकरूपाय रजोरूपाय ते नमः।
नमो नीलस्वरूपाय भैरवाय नमो नमः ॥128॥

नमो गणस्वरूपाय गणनाथाय ते नमः।
नमो विश्वप्रकाशाय भैरवाय नमो नमः ॥129॥

नमो योगिप्रकाशाय योगिगम्याय ते नमः।
नमो हेरम्बरूपाय भैरवाय नमो नमः ॥130॥

नमस्त्रिधा स्वरूपाय रूपदाय नमो नमः।
नमः स्वरस्वरूपाय भैरवाय नमो नमः ॥131॥

नमः सरस्वतीरूप बुद्धिरूपाय ते नमः।
नमः वन्द्यस्वरूपाय भैरवाय नमो नमः ॥132॥

नमस्त्रि विक्रमरूपाय त्रिस्वरूपाय ते नमः।
नमः शशाङ्करूपाय भैरवाय नमो नमः ॥133॥

नमो व्यापकरूपाय व्याप्यरूपाय ते नमः।
नमो भैरवरूपाय भैरवाय नमो नमः ॥134॥

नमो विशदरूपाय भैरवाय नमो नमः।
नमः सत्त्वस्वरूपाय भैरवाय नमो नमः ॥135॥

नमः सूक्तस्वरूपाय शिवदाय नमो नमः।
नमो गङ्गास्वरूपाय यमुनारूपिणे नमः ॥136॥

नमो गौरीस्वरूपाय भैरवाय नमो नमः।
नमो दुःखविनाशाय दुःखमोक्षस्वरूपिणे ॥137॥

महाचलाय वन्द्याय भैरवाय नमो नमः।
नमो नन्दस्वरूपाय भैरवाय नमो नमः ॥138॥

नमो नन्दिस्वरूपाय स्थिररूपाय ते नमः।
नमः केलिस्वरूपाय भैरवाय नमो नमः ॥139॥

नमः क्षेत्रनिवासाय वासिने ब्रह्मवादिने।
नमः शान्ताय शुद्धाय भैरवाय नमो नमः ॥140॥

नमो नर्मदरूपाय जलरूपाय ते नमः।
नमो विश्वविनोदाय जयदाय नमो नमः ॥141॥

नमो महेन्द्ररूपाय महनीयाय ते नमः।
नमः संसृतिरूपाय शरणीयाय ते नमः ॥142॥

नमस्त्रिबन्धुवासाय बालकाय नमो नमः।
नमः संसारसाराय सरसां पतये नमः ॥143॥

नमस्ते जलरूपाय भैरवाय नमो नमः।
नमः काव्यस्वरूपाय भैरवाय नमो नमः ॥144॥

नमो गोकर्णरूपाय ब्रह्मवर्णाय ते नमः।
नमः शङ्करवर्णाय हस्तिकर्णाय ते नमः ॥145॥

नमो विष्टकर्णाय यज्ञकर्णाय ते नमः।
नमः शम्बुककर्णाय भैरवाय नमो नमः ॥146॥

नमो दिव्यसुकर्णाय कालकर्णाय ते नमः।
नमो भयदकर्णाय भैरवाय नमो नमः ॥147॥

नमो आकाशवर्णाय कालकर्णाय ते नमः।
नमो दिग्रूपकर्णाय भैरवाय नमो नमः ॥148॥

नमो विशुद्धकर्णाय विमलाय नमो नमः।
नमः सहस्रकर्णाय भैरवाय नमो नमः ॥149॥

नमो नेत्रप्रकाशाय सुनेत्राय नमो नमः।
नमो वरदनेत्राय जयनेत्राय ते नमः ॥150॥

नमो विमलनेत्राय योगिनेत्राय ते नमः।
नमः सहस्रनेत्राय भैरवाय नमो नमः ॥151॥

नमः कलिन्दरूपाय कलिन्दाय नमो नमः।
नमो ज्योति-स्वरूपाय ज्योतिषाय नमो नमः ॥152॥

नमस्तारप्रकाशायताररूपिन् नमोऽस्तुते।
नमो नक्षत्रनेत्राय भैरवाय नमो नमः ॥153॥

नमश्चन्द्रप्रकाशाय चन्द्ररूप नमोऽस्तु ते।
नमो रश्मिस्वरूपाय भैरवाय नमो नमः ॥154॥

नमः आनन्दरूपाय जयानन्दस्वरूपिणे।
नमो द्रविडरूपाय भैरवाय नमो नमः ॥155॥

नमः शङ्खनिवासाय शङ्कराय नमो नमः।
नमो मुद्राप्रकाशाय भैरवाय नमो नमः ॥156॥

नमो न्यासस्वरूपाय न्यासरूप नमोऽस्तुते।
नमो बिन्दुस्वरूपाय भैरवाय नमो नमः ॥157॥

नमो विसर्गरूपाय प्रणवरूप ते नमः।
नमो मन्त्रप्रकाशाय भैरवाय नमो नमः ॥158॥

नमो जम्बुकरूपायाय जङ्गमाय नमो नमः।
नमो गरुडरूपाय भैरवाय नमो नमः ॥159॥

नमो लम्बुकरूपाय लम्बिकाय नमो नमः।
नमो लक्ष्मीस्वरूपाय भैरवाय नमो नमः ॥160॥

नमो वीरस्वरूपाय वीरणाय नमो नमः।
नमः प्रचण्डरूपाय भैरवाय नमो नमः ॥161॥

नमो दम्भस्वरूपाय डमरुधारिन्नमोऽस्तु ते।
नमः कलङ्कनाशाय कालनाथाय ते नमः ॥162॥

नमः सिद्धिप्रकाशाय सिद्धिदाय नमो नमः।
नमः सिद्धस्वरूपाय भैरवाय नमो नमः ॥163॥

नमो धर्मप्रकाशाय धर्मनाथाय ते नमः।
धर्माय धर्मराजाय भैरवाय नमो नमः ॥164॥

नमो धर्माधिपतये धर्मध्येयाय ते नमः।
नमो धर्मार्थसिद्धाय भैरवाय नमो नमः ॥165॥

नमो निर्जररूपाय रूपारूपप्रकाशिने।
नमो राजप्रकाशाय भैरवाय नमो नमः ॥166॥

नमः प्रतापसिंहाय प्रतापाय नमो नमः।
नमः कोटिप्रतापाय भैरवाय नमो नमः ॥167॥

नमः सहस्त्ररूपाय कोटिरूपाय ते नमः।
नमः आनन्दरूपाय भैरवाय नमो नमः ॥168॥

नमः संहारबन्धाय वन्धकाय नमो नमः।
नमो विमोक्षरूपाय मोक्षदाय नमो नमः ॥169॥

नमो विष्णुस्वरूपाय व्यापकाय नमो नमः।
नमो माङ्गल्यनाथाय शिवनाथाय ते नमः ॥170॥

नमो व्यालाय व्याघ्राय व्याघ्ररूप नमोऽस्तु ते।
नमो व्यालविभूषाय भैरवाय नमो नमः ॥171॥

नमो विद्याप्रकाशाय विद्यानां पतये नमः।
नमो योगिस्वरूपाय क्रूररूपाय ते नमः ॥172॥

नमः संहाररूपाय शत्रुनाशाय ते नमः।
नमो पालकरूपाय भैरवाय नमो नमः ॥173॥

नमः कारुण्यदेवाय देवदेवाय ते नमः।
नमो विश्वविलाशाय भैरवाय नमो नमः ॥174॥

नमो नमः प्रकाशाय काशीवासिन्नमोऽस्तुते।
नमो भैरवक्षेत्राय क्षेत्रपालाय ते नमः ॥175॥

नमो भद्रस्वरूपाय भद्रकाय नमो नमः।
नमो भद्राधिपतये भयहन्त्रे नमोऽस्तु ते ॥176॥

नमो मायाविनोदाय मायिने मदरूपिणे।
नमो मत्ताय शान्ताय भैरवाय नमो नमः ॥177॥

नमो मलयवासाय कैलाशाय नमो नमः।
नमः कैलाशवासाय कालिकातनयाय ते ॥178॥

नमः संसारसाराय भैरवाय नमो नमः।
नमो मातृविनोदाय विमलाय नमो नमः ॥179॥

नमो यमप्रकाशाय नियमाय नमो नमः।
नमः प्राणप्रकाशाय ध्यानाधिपतये नमः ॥180॥

नमः समाधिरूपाय निर्गुणाय नमो नमः।
नमो मन्त्रप्रकाशाय मन्त्ररूपाय ते नमः ॥181॥

नमो वृन्दविनोदाय वृन्दकाय नमो नमः।
नमो बृंहितरूपाय भैरंवाय नमो नमः ॥182॥

नमो मान्यस्वरूपाय मानदाय नमो नमः।
नमो विश्वप्रकाशाय भैरवाय नमो नमः ॥183॥

नमो नैमिषपीठाय सिद्धपीठाय ते नमः।
नमो मण्डलपीठाय भक्तपीठाय ते नमः ॥184॥

नमो यशोदानाथाय कामनाथाय ते नमः।
नमो विनोदनाथाय सिद्धनाथाय ते नमः ॥185॥

नमो नाथाय नाथाय ज्ञाननाथाय ते नमः।
नमः शङ्करनाथाय जयनाथाय ते नमः ॥186॥

नमो मुद्गलनाथाय नीलनाथाय ते नमः।
नमो बालकनाथाय धर्मनाथाय ते नमः ॥187॥

विश्वनाथाय नाथाय कार्यनाथाय ते नमः।
नमो भैरवनाथाय महानाथाय ते नमः ॥188॥

नमो ब्रह्मसनाथाय योगनाथाय ते नमः।
नमो विश्वविहाराय विश्वमाराय ते नमः ॥189॥

नमो रङ्गसनाथाय रङ्गनाथाय ते नमः।
नमो मोक्षसनाथाय भैरवाय नमो नमः ॥190॥

नमो गोरक्षनाथाय नन्दनाथाय ते नमः।
नमो मन्दारनाथाय नन्दनाथाय ते नमः ॥191॥

नमो मङ्गलनाथाय चम्पानाथाय ते नमः।
नमः सन्तोषनाथाय भैरवाय नमो नमः ॥192॥

नमो निर्धननाथाय सुखनाथाय ते नमः।
नमः कारुण्यनाथाय भैरवाय नमो नमः ॥193॥

नमो द्रविडनाथाय दरिनाशाय ते नमः।
नमः संसारनाथाय जगन्नाथाय ते नमः ॥194॥

नमो माध्वीकनाथाय मन्त्रनाथाय ते नमः।
नमो न्याससनाथाय घ्याननाथाय ते नमः ॥195॥

नमो गोकर्णनाथाय महानाथाय ते नमः।
नमः शुभ्रसनाथाय भैरवाय ते नमः ॥196॥

नमो विमलनाथाय मण्डलनाथाय ते नमः।
नमः सरोजनाथाय सत्यनाशाय ते नमः ॥197॥

नमो भक्तसनाथाय भक्तिनाथाय ते नमः।
नमो मोहननाथाय वत्सनाथाय ते नमः ॥198॥

नमो मातृसनाथाय विश्वनाथाय ते नमः।
नमो बिन्दुसनाथाय जयनाथाय ते नमः ॥199॥

नमो मङ्गलनाथाय धर्मनाथाय ते नमः।
नमो गङ्गासनाथाय भूमिनाथाय ते नमः ॥200॥

नमो धीरसनाथाय बिन्दुनाथाय ते नमः।
नमः कञ्चुकिनाथाय शृङ्गिनाथाय ते नमः ॥201॥

नमः समुद्रनाथाय गिरिनाथाय ते नमः।
नमो माङ्गल्यनाथाय कद्रुनाथाय ते नमः ॥202॥

नमो वेदान्तनाथाय श्रीनाथाय नमो नमः।
नमो ब्रह्माण्डनाथाय भैरवाय नमो नमः ॥203॥

नमो गिरीशनाथाय वामनाथाय ते नमः।
नमो बीजसनाथाय भैरवाय नमो नमः ॥204॥

नमो मन्दिरनाथाय मनोनाथाय ते नमः।
नमो भैरवनाथाय भैरवाय नमो नमः ॥205॥

अम्बानाथाय नाथाय जन्तुनाथाय ते नमः।
नमः कालिसनाथाय भैरवाय नमो नमः ॥206॥

नमो मुकुन्दनाथाय कुन्दनाथाय ते नमः।
नमः कुण्डलनाथाय भैरवाय नमो नमः ॥207॥

नमोऽष्टचक्रनाथाय शूलनाथाय ते नमः।
नमो विभूतिनाथाय शूलनाथाय ते नमः ॥208॥

नमो न्यायसनाथाय न्यायनाथाय ते नमः।
नमो दयासनाथाय जङ्गमनाथाय ते नमः ॥209॥

नमो विशदनाथाय जगन्नाथाय ते नमः।
नमः कामिकनाथाय भैरवाय नमो नमः ॥210॥

नमः क्षेत्रसनाथाय जीवनाथाय ते नमः।
नमः शैलसनाथाय चैलनाथाय ते नमः ॥211॥

नमो मात्रासनाथाय भैरवाय नमो नमः।
नमो द्वन्द्वसनाथाय भैरवाय नमो नमः ॥212॥

नमः शूरसनाथाय शूरनाथाय ते नमः।
नमः सौजन्यनाथाय सौजन्याय नमो नमः ॥213॥

नमो दुष्टसनाथाय भैरवाय नमो नमः।
नमो भय-सनाथाय बिम्बनाथाय ते नमः ॥214॥

नमो भैरवनाथाय भैरवाय नमो नमः।
नमो विटङ्कनाथाय टङ्कनाथाय ते नमः ॥215॥

नमश्चर्मसनाथाय खड्गनाथाय ते नमः।
नमः शक्तिसनाथाय धनुर्नाथाय ते नमः ॥216॥

नमो वाणसनाथाय शापनाथाय ते नमः।
नमो यन्त्रसनाथाय भैरवाय नमो नमः ॥217॥

नमो गण्डूषनाथाय गण्डूषाय नमो नमः।
नमो डाकिनीनाथाय भैरवाय नमो नमः ॥218॥

नमो डामरनाथाय डारकाय नमो नमः।
नमो डङ्कसनाथाय डङ्कनाथाय ते नमः ॥219॥

नमो माण्डवनाथाय यज्ञनाथाय ते नमः।
नमो यजुःसनाथाय क्रीडानाथाय ते नमः ॥220॥

नमः सामसनाथायाथर्वनाथाय ते नमः।
नमः शून्याय नाथाय स्वर्गनाथाय ते नमः ॥221॥

इस सहस्रनाम के अन्त में 22 पद्यों से पाठ की महिमा एवं फलश्रुति दी गई है, जिसमें, नित्यपाठ, त्रिकालपाठ, श्रद्धापूर्वक श्रवण, रात्रि में पाठ, देवगृह और श्मशान भूमि में पाठ का महत्त्व बतलाकर प्रत्येक पाठ से मन कामनाओं की पूर्ति का उल्लेख है। इसी सहस्रनाम का पाठ करने के लिए भगवान् रुद्र ने श्रीराम को उपदेश दिया था। तदनन्तर क्रमशः लक्ष्मण, दुर्वासा, पाण्डव और कृष्ण ने पाठ करके कृपा प्राप्त की तथा श्रीकृष्ण के द्वारा ही यह सर्वत्र प्रस्तुत हुआ, यह भी बताया है। अन्त में कहा गया है कि—

अनेन स्तोत्रपाठेन किमलभ्यं भवेदिति।
सर्वलोकस्य पूज्यस्तु सत्यं सत्यं न संशयः ॥242॥इति।
इति श्रीरुद्रयामलोक्तं श्रीबटुकभैरव-सहस्रनामस्त्रोतम्॥

श्री क्षेत्रपाल-भैरवाष्टक स्तोत्रम्

ॐ यं यं यं यक्षरूपं दश दिशिवदनं भूमिकम्पायमानं,
सं सं सं संहारमूर्ति शुभमुकुटजटाशेखरं चन्द्रबिम्बम्।
दं दं दं दीर्घकायं विकृतनखमुखं चोर्ध्वरोमं करालं,
पं पं पं पापनाशं प्रणमत सततं भैरवं क्षेत्रपालम् ॥1॥
रं रं रं रक्तवर्णं कटकटिततनुं तीक्ष्णदंष्ट्राविशालं,
घं घं घं घोरघोषं घघघघघटितं घर्घराघोरनादम्।
कं कं कं कालरूपं धगधगधगितं ज्वालितं कामदेहं,
दं दं दं दिव्यदेहं प्रणमत सततं भैरवं क्षेत्रपालम् ॥2॥

लं लं लं लम्बदन्तं लललललुलितं दीर्घजिह्वं करालं,
धूं धूं धूं धूम्रवर्णं स्फुटविकृतमुखं भासुरं भीमरूपम्।
रुं रुं रुं रुण्डमालं रुधिरमयमुखं ताम्रनेत्रं विशालं,
नं नं नं नग्नरूपं प्रणमत सततं भैरवं क्षेत्रपालम् ॥3॥

वं वं वं वायुवेगं प्रलयपरिमितं ब्रह्मरूपं स्वरूपं,
खं खं खं खड्गहस्तं त्रिभुवननिलयं भास्करं भीमरूपम्।
चं चं चं चालयन्तं चलचलचलितं चालितं भूतचक्रं,
मं मं मं मायकायं प्रणमत सततं भैरवं क्षेत्रपालम् ॥4॥

शं शं शं शङ्खहस्तं शशिकरधवलं पूर्णतेजः स्वरूपं,
भं भं भं भावरूपं कुलमकुलकुलं मन्त्रमूर्तिं स्वतत्त्वम्।
भं भं भं भूतनाथं किलकिलितवचश्चारु जिह्वालुलन्तं,
अं अं अं अन्तरिक्षं प्रणमत सततं भैरवं क्षेत्रपालम् ॥5॥

खं खं खं खड्गभेदं विषममृतमयं काल-कालान्धकारं,
क्षिं क्षिं क्षिं क्षिप्रवेगं दह दह दहनं नेत्रसन्दीप्यमानम्।
हूं हूं हूं हुङ्कारशब्दं प्रकटितगहनं गर्जितं भूमिकम्पं,
बं बं बं बाललीलं प्रणमत सततं भैरवं क्षेत्रपालम् ॥6॥

सं सं सं सिद्धियोगं सकलगुणमयं देवदेवं प्रसन्नं,
पं पं पं पद्मनाभं हरिहरवदनं चन्द्रसूर्याग्निनेत्रम्।
यं यं यं यक्षनाथं सततभयहरं सर्वदेवस्वरूपम्,
रौं रौं रौं रौद्ररूपं प्रणमत सततं भैरवं क्षेत्रपालम् ॥7॥

हं हं हं हंसघोषं हसितकहकहाराव-रौद्राट्टहासं,
यं यं यं यक्षरूपं शिरसि कनकजं मौकुटं सन्दधानम्।
रं रं रं रङ्गरङ्ग-प्रहसितवदनं पिङ्गलं श्यामवर्णं,
सं सं सं सिद्धनाथं प्रणमत सततं भैरवं क्षेत्रपालम् ॥8॥

एवं वै भावयुक्तः प्रपठति मनुजो भैरवस्याष्टकं यो,
निर्विघ्नं दुःखनाशं भवति भयहरं शाकिनीनां विनाशम्।
दस्यूनां व्याघ्रसर्पोद्भवजनितभियां जायते सर्वनाशः,
सर्वे नश्यन्ति दुष्टा ग्रहगणविषमा लभ्यते चेष्टसिद्धिः ॥9॥

॥ इति विश्वसारोद्धारे क्षेत्रपाल भैरवाष्टक स्तोत्रम् ॥

श्रीबटुक-भैरव-मन्त्र-साधना

श्रीबटुकभैरव की साधना में मन्त्र, यन्त्र, तन्त्र और स्तोत्र-साधनाएं प्रमुख हैं। साधक जिस रूप में साधना करना चाहें गुरु-उपदेश से करें। मन्त्र-साधना में विनियोग, न्यास और ध्यान के साथ मन्त्र का जप होता है। जैसा मन्त्र का स्वरूप होता है उसके अनुसार ही विनियोगादि में भी परिवर्तन होता रहता है। मन्त्रों के साथ कामना की दृष्टि से बीजमन्त्रों का संयोग पल्लव अथवा सम्पुट के रूप में किया जाता है। इसके कारण भी विधि में कुछ परिवर्तन होता है।

श्रीबटुकभैरव का प्रसिद्ध मन्त्र—**ह्रीं बटुकाय आपदुद्धारणाय कुरु कुरु बटुकाय ह्रीं**' यह 21 अक्षरों का है। '**तन्त्रसार**' में '**एकविंशत्यक्षरात्मा शक्तिरुद्धो महामनुः**' कहकर इसी मन्त्र की महिमा बतलाई है। '**रुद्रयामल**' में इस मन्त्र के आदि में 'ॐ' लगाने की भी सूचना है—'**आदौ प्रणवमुद्धृत्य देवीप्रणवमुद्धरेत्** इत्यादि। जप से पूर्व मुख्य रूप से 10 न्यास करने का आदेश रुद्रयामल में दिया गया है। उन न्यासों के नाम इस प्रकार हैं—**1. प्रेतबीज न्यास 2. सिंहबीज न्यास, 3. क्वाणबीज न्यास, 4. मन्त्रबीज न्यास, 5. महाश्रीबीजन्यास 6. प्राणबीज न्यास, 7. घण्टाबीज न्यास 8. ख्यातिबीज न्यास, 9. मूलबीज न्यास तथा 10. भ्रामरीबीज न्यास**। इनके अतिरिक्त 'मर्मन्यास विधि' में **1. आकूति बीजन्यास, 2. कालबीजन्यास, 3. विद्याबीज न्यास एवं कतिपय अन्य (क) श्रृंखलाबीज न्यास (महापराख्यबीज न्यास), (ख) मातृकाबीज न्यास** और **महासरस्वतीबीज न्यास** के भी विधान हैं। इसी साधना में ऊर्ध्वाम्नाय में '**महाषोढा न्यास**'—जिसमें **1. प्रपञ्चन्यास, 2. भुवन न्यास, 3. मूर्तिन्यास, 4. मन्त्रन्यास, 5. दैवतन्यास** और **6. मातृकान्यास** का आदेश है। '**सिंहसिद्धान्त-सिन्धु**' खण्ड 2 में इस सम्बन्ध में विस्तार से प्रतिपादन हुआ है जो वहीं द्रष्टव्य है।

श्रीबटुक-भैरव के अन्य मन्त्र

1. '**कालसंकर्षण-तन्त्र**' में—

तारो माया तदनु बटुकाय द्वयं क्ष्रौं तदाप—
च्छब्दोद्वाराय च शिरसि कुरु द्वन्द्वमुक्तञ्च सम्यक्।
ह्रींबीजं यद्बटुकपुटितं भौवनं चाग्निजाया—
एषा विद्या बटुक भव ते वाञ्छितं मे ददातु ॥

कहकर "ॐ ह्रीं बां बटुकाय क्ष्रौं, क्ष्रौं आपदुद्धारणाय कुरु कुरु बटुकाय ह्रीं बटुकाय स्वाहा" यह मन्त्र बतलाया है। इस मन्त्र के ऋषि कालाग्निरुद्र हैं।

2. ॐ ह्रीं क्ष्मौं व्रौं ह्रीं ॐ स्वाहा आपदुद्धारणभैरवाय नमः।

यह मन्त्र भी अन्यत्र संकेतित हैं।

3. रक्षा-प्राप्ति के लिए निम्नलिखित मन्त्र का जप करें–

ॐ ह्रीं भैरव भैरव भयकरहर मां रक्ष रक्ष हुं फट् स्वाहा।

4. सर्वविध बाधा-निवारण के लिए यह मन्त्र उत्तम है–

ॐ भैरवाय वं वं वं हां क्ष्रौं नमः।

5. सिद्धिप्रद-बटुक-भैरव मन्त्र

ॐ ह्रीं बटुकाय क्ष्रौं क्ष्रौं आपदुद्धारणाय सर्वबाधाविनिर्मुक्तं धनधान्य-समन्वितं च मां कुरु कुरु बटुकाय ह्रीं ॐ नमः।

6. श्रीबटुक-मालामन्त्र (मन्त्रदीपप्रकाशिकोक्त)

ॐ ऐं ह्रीं श्रीं ॐ ह्रीं बटुकाय आपदुद्धारणाय कुरु कुरु बटुकाय ह्रीं द्रां द्रीं क्रीं ल्वं सः हौं हौं हां ही द्रुं भ्रां भ्रीं भ्रूं व्रं शलवरयूं महाकालाय महाभैरवाय मां रक्षा रक्ष मम पुत्रान् रक्ष रक्ष मम भ्रातरं रक्ष रक्ष मम शिष्यान् रक्ष रक्ष साधकान् रक्ष रक्ष सम परिवारं रक्ष रक्ष ममोपरि दुष्टदृष्टि-दुष्टबुद्धिं प्रयोगान् कुर्वन्ति कारयन्ति करिष्यन्ति तान् हन हन पापं मथ आरोग्यं कुरु परबलानि क्षोभय क्षोभय क्षौं क्षौं क्षौं ह्रीं बटुकाय केलिरुद्राय नमः।

यह माला-मन्त्र मूल-मन्त्र जप के आदि और अन्त में 3-3 बार जपना चाहिए।

7. अरिष्टनिवारण-मन्त्र

ॐ क्षौं क्षौं स्वाहा।

8. श्री बटुक-गायत्री (शान्ति प्राप्ति के लिए)

ॐ हां हौं नमः ॐ भूः ॐ भुवः ॐ स्वः ॐ ह्रीं बटुकाय विद्महे आपदुद्धारणाय धीमहि तन्नो बटुकः प्रचोदयात् ॐ स्वः ॐ भुवः ॐ भूः ॐ नमः हौं हां ॐ।


श्रीबटुक-भैरव-यन्त्र-साधना

यन्त्ररूप साधना में इष्टदेव का आवास यन्त्र में ही माना जाता है। प्रतिमा के समान प्रतीकात्मक यन्त्र की शस्त्राज्ञा के अनुसार सुवर्ण, रजत, ताम्र, अष्टधातु, त्रिधातु अथवा स्फटिक आदि मणियों पर आकृति बनवाकर पूजा की जाती है। यदि वैसा न हो सके तो भूर्जपत्र पर लिखकर अथवा किसी पात्र में ही नित्य लिखकर पूजा करते हैं। ये यन्त्र मुख्यतः 1—पूजा के लिए और 2—धारण करने के लिए बनाए जाते हैं।

श्री बटुकभैरव-पूजा-यन्त्र

मध्ये चाष्टदलं पद्मं कर्णिकाकेसरोज्ज्वलम्।
त्रिकोणं च ततः कृत्वा षट्कोणं च ततो न्यसेत् ॥
वर्तुलं चाष्टपत्रं च चतुरस्त्रत्रयात्मकम्।

इस प्रमाण के अनुसार श्रीभैरव का यन्त्र विधिपूर्वक बनाकर प्रतिष्ठित कर लें तथा बाद में जप करने से पूर्व प्रतिदिन इसकी पूजा करें।



इस यन्त्र की आगमोकत पूजा का प्रकार अतिविस्तृत हैं जिसे **'वटुकभैरवोपासना'** ग्रन्थ (बृहज्ज्योतिषार्णवान्तर्गत), **सिंहसिद्धान्तसिन्धु** (द्वितीय खण्ड) तथा अन्य आगमों से प्राप्त करें। साथ ही दीक्षा प्राप्त करना भी आवश्यक है।

1—यन्त्र-प्राण-प्रतिष्ठाविधि

हाथ में जल, अक्षत और पुष्प लेकर—**ॐ अद्य ब्रह्मणो द्वितीये परार्धे श्रीश्वेतवाराहकल्पे वैवस्वतमन्वन्तरे अष्टाविंशतितमे कलियुगे कलिप्रथमचरणे भूर्लोके भरतखण्डे रामराज्ये आर्यावर्तैकदेशान्तर्गतपुण्य-क्षेत्रे शालिवाहनकृते शके...अमुकसंवत्सरे...मासे,...पक्षे...तिथौ...वासरे मम...आत्मनः श्रुतिस्मृति-पुराणोक्तफलप्राप्त्यर्थं अमुकयन्त्रस्य... ताडनावघातादिदोषपरिहारार्थमग्न्युत्तारण (धूपोत्तारण) पूर्वकं प्राणप्रतिष्ठां करिष्ये।**[1] यह बोलकर किसी पात्र में उन्हें छोड़ दें और यदि मन्त्र किसी धातु का बना हुआ हो तो उस पर शुद्ध घी लगा दें। यदि कागज पर हो तो उसके सामने घृत की धूप देकर उससे धूपित करें। फिर दूध और जल मिलाकर उसे स्नान कराए और इष्ट मन्त्र बोलता रहे। फिर विनियोग करे।

ॐ अस्य श्रीप्राणप्रतिष्ठामन्त्रस्य ब्रह्मविष्णुरुद्रा ऋषयः ऋग्यजुःसामानि छन्दांसि प्राणशक्तिर्देवता आं बीजं ह्रीं शक्तिः क्रों कीलकं अस्मिन् यन्त्रे प्राणप्रतिष्ठापने विनियोगः। (इससे जल छोड़ें)।

ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हों ॐ क्षं सं सः ह्रीं ॐ आं ह्रीं क्रों अस्य यन्त्रस्य प्राणा इह प्राणाः। ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हों ॐ क्षं सं हं सः ह्रीं ॐ आं ह्रीं क्रों अस्य यन्त्रस्य जीव इह स्थितः। ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हों ॐ क्षं सं हं सः ह्रीं ॐ आं ह्रीं क्रों अस्य यन्त्रस्य सर्वेन्द्रियाणि वाङ्मनस्त्वक् चक्षुः श्रोत्रजिह्वाघ्राणप्राणा इहागत्य इहैव सुखं चिरं तिष्ठन्तु स्वाहा।

ॐ मनो जूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमन्तनो त्वरिष्टं यज्ञं समिमं दधातु। विश्वे देवास इह मादयन्ताम् ॐ प्रतिष्ठ। एष वै प्रतिष्ठा नाम यज्ञो यत्रैतेन यज्ञेन यजन्ते। सर्वमेव प्रतिष्ठितं भवति। अस्मिन् यन्त्रे यन्त्रदेवता सुप्रतिष्ठिता वरदा भवतु।

---

1. यहां खाली छोड़े हुए स्थानों में स्थान, शक, वर्ष, मास, पक्ष, तिथि, वार और अपना नाम क्रमशः बोलें तथा जिस देवता का यन्त्र हो उनका नाम लें।
2. मन्त्र और तन्त्रशास्त्रों में विभिन्न यन्त्रों की प्रतिष्ठा एवं पूजा-पद्धतियों का बड़े विस्तार के साथ विवेचन किया है। प्रसिद्ध-प्रसिद्ध पूजा-यन्त्र की नित्य-पूजा में आवरण पूजा का विधान है। इसमें यन्त्र में अलिखित बिन्दु, त्रिकोण, षट्कोण, अष्टदल एवं भूपूर आदि स्थानों तथा दिशा-विदिशाओं में स्थापित होने वाले देवताओं की पूजा और तर्पण किए जाते हैं। यह सब कार्य समय और सुविधा, निष्ठा और व्यवस्था एवं कर्मसम्बन्धी ज्ञान तथा क्रिया को दृष्टि में रखकर करना चाहिए।

फिर गन्ध पुष्पादि पञ्चोपचार से पूजन करें और यन्त्र के षोडश-संस्कारों[1] की सिद्धि के लिए 16 बार इष्ट-मन्त्र का जप करें। फिर– **अस्य यन्त्रस्य षोडश संस्काराः सम्पद्यन्ताम्।** इतना बोलकर प्रणाम करे। फिर यन्त्र पूजन का हो तो नित्य पूजन करे और धारण करने का यन्त्र हो तो उसे धारण करे। अथवा संक्षेप में इतना ही करे–

संक्षिप्त प्राण-प्रतिष्ठा-मन्त्र–

कुशा अथवा दूर्वा लेकर उससे यन्त्र का स्पर्श करते हुए–

ॐ ऐं ह्रीं आं ह्रीं क्रों यं रं लं वं शं षं सं हं ॐ हं सः सोहं सोहं हंसः शिवः अस्य यन्त्रस्य प्राणा इह प्राणः।

ऐं ह्रीं श्रीं आं ह्रीं क्रों अस्य यन्त्रस्य जीव इह स्थितः। सर्वेन्द्रियाणि वाङ्मनस्त्वक्चक्षुःश्रोत्रजिह्वाघ्राणप्राणा इहैवागत्य सुखं चिरं तिष्ठन्तु स्वाहा।

ॐ ऐं ह्रीं श्रीं असुनीते पुनरस्मासु चक्षुःपुनः प्राणमिह नो धेहि भोगम्। ज्योक् पश्येम सूर्यमुच्चरन्तमनुमते मृडया नः स्वस्ति ॥

इन मन्त्रों को बोलकर यन्त्र में प्राण, जीव, वाणी, मन, त्वचा, नेत्र, कर्ण, जिह्वा, नासिका आदि सभी इन्द्रियां निवास कर रही हैं और यह यन्त्र साक्षात् भगवत्स्वरूप हो गया है ऐसा मानकर यन्त्र की लिखे अनुसार पूजा करें।

2–यन्त्र-धारण-विधि


सभी प्रकार के यन्त्रों को धारण करने के लिए तन्त्रशास्त्रों में जो विधि कही गई है, वह इस प्रकार है–

सुस्नातः सुवस्त्र-चन्दनादिभिर्भूषितो यथोक्तद्रव्यैः शुद्धदेशे यन्त्रं लिखेत्। तत्रादौ षष्ठ्यन्तं साधकपदं मध्ये बीजं तदधो द्वितीयान्तं साध्यनाम तत्पार्श्वयोः 'कुरु-कुरु' तदधो वियद्युक्तं संर्गबीज लिखेत्। तत ईशानादि-चतुष्कोणेषु 'हंसः सोऽहं' प्राणबीजं चतुर्दिक्षु दिग्बीजानि प्रतिदिशं यन्त्रगायत्रीवर्णान् लिखेत्। ततः प्राणप्रतिष्ठामन्त्रवर्णेश्च यन्त्रं वेष्टयेत्।

(जो साधक यन्त्र को धारण करना चाहता हो वह शुभ मुहूर्त वाले दिन प्रातः) शुद्ध स्नान करके, शुद्ध धुले हुए वस्त्र धारण कर मस्तक पर तिलक लगाए तथा 'यन्त्र लिखने के लिए दिखाए गए द्रव्यों से' किसी शुद्ध स्थान पर बैठकर यन्त्र लिखे।

1. सोलह संस्कार जिस प्रचार बालक के गर्भ से लेकर जीवन के अन्त तक चलते हैं वैसे ही यहां भी होता है।

यह यन्त्र चौकोर, दिशाओं के द्वार से युक्त लिखे और इसके बीच में पहले एक लाइन में साधक के नाम के साथ षष्ठी विभक्ति लगाकर लिखे, उसके नीचे 'क्लीं' बीज और उसके नीचे जो कार्य सिद्ध करना हो वह वाक्य द्वितीया विभक्ति लगाकर लिखें। उसके आस-पास **'कुरु-कुरु'** लिखे तथा उसके नीचे **'अः'** लिखना चाहिए। फिर ईशान आदि चार कोणों में **'हंसः सोऽहं'** यह प्राण बीज लिखे। पूर्व आदि चारों दिशाओं में उन-उन दिशाओं के बीज अथवा इन्द्र, वरुण, कुबेर और यम के नामों के साथ चतुर्थी विभक्ति सहित नमः पद जोड़ कर लिखे (अथवा इन चारों देवताओं के आयुधों की आकृति बनाए।) इसके पश्चात् आठों दिशाओं में यन्त्र गायत्री–**'यन्त्रराजाय विद्महे, महायन्त्राय धीमहि। तन्नो यन्त्रः प्रचोदयात्।'** (इस मन्त्र) के तीन-तीन अक्षर लिखे। तदनन्तर प्राण-प्रतिष्ठा मन्त्र के अक्षर **"आं ह्रीं क्रों"** से यन्त्र को वेष्टित करे। इसके अनुसार लिखे गए यन्त्र का स्वरूप इस प्रकार होगा–



इस प्रकार यन्त्र लिखकर सावधानी से उस पर अपनी इष्ट कार्यसिद्धि के लिए भूर्जपत्रादि पर लिखा हुआ यन्त्र सोना, **चांदी, तांबा** आदि के बने ताबीज़ में रखकर उसकी प्राण-प्रतिष्ठा करे।

प्राणप्रतिष्ठा विधि–सबसे पहले एक श्वेत वस्त्र पर सर्वतोभद्र अथवा अष्टदल कमल का आकार चावलों से बनाए। फिर उसके मध्यभाग में कलश-स्थापन करने की विधि से कलश-स्थापित करे। उस कलश पर एक पात्र (छोटी थाली या कटोरी) चावल भर कर रखें। और उसमें ऊपर लिखा हुआ

यन्त्र खुला हुआ रखकर उसके बीच में (ताबीज में रखे हुए) यन्त्र की स्थापना करें।

मण्डलस्य कोणचतुष्टये चतुष्कलशान् संस्थाप्य प्रतिकलशं 'आं ह्रीं क्रों' इति त्र्यक्षरीं विद्यां कूर्चवीजयुतां सहस्रं जपेत्।

भद्रमण्डल के चारों कोनों पर चार कलश स्थापित कर प्रत्येक पर **'आं ह्रीं क्रों स्वाहा'** इस (त्र्यक्षरी) विद्या का एक सहस्र बार जप करें।

ततस्तद्यन्त्रं चतुष्कलशोदकैरभिषेकमन्त्रैरभिषिच्य गन्धादिभिः सम्पूज्य यन्त्रे प्राण-प्रतिष्ठामन्त्रेण यन्त्रदेवताप्राणान् प्रतिष्ठाप्य यन्त्रगायत्र्या यन्त्रं षोडशोपचारैः सम्पूज्य ब्राह्मणान् सुवासिनीः कुमारीश्च सम्भोज्य दक्षिणां दत्त्वा तेषामाशिषो गृहीत्वा यथोक्तांगे यन्त्रं बध्नीयात्।

तदनन्तर चारों दिशाओं में स्थापित कलशों के जल के द्वारा अभिषेक के मन्त्र बोलते हुए मन्त्र का प्रोक्षण करे फिर गन्ध आदि से उसकी पूजा करके यन्त्र पर प्राण-प्रतिष्ठा के मन्त्रों से यन्त्रदेवता के प्राणों को आवाहित कर प्रतिष्ठित करे तथा यन्त्रगायत्री द्वारा यन्त्र की षोडशोपचार से पूजा करके ब्राह्मण, सौभाग्यवती स्त्रियां और कन्याओं को भोजन कराकर दक्षिणा दे तथा उनके आशीर्वाद ग्रहण कर विधि में बताए अनुसार अपने अंग पर यन्त्र धारण करे। **अभिषेक मन्त्र—देवस्य त्वा सवितुः प्रसवेऽश्विनो**[1] इत्यादि अथवा **'आपो हि ष्ठा मयो भुवस्तान ऊर्जे दधात न**[2]**'** इत्यादि तीन मन्त्र बोलने चाहिए।

किन्तु सर्व साधारण की सुविधा के लिए हम यहां यन्त्र पूजन-प्रकार

---

1. पूरे मन्त्र इस प्रकार हैं—
ॐ देवस्य त्वा सवितुः प्रसवेऽवेश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम्।
सरस्वत्यै व्याचो यन्तुर्यन्त्रिय दधामि बृहस्पतेष्ट्वा साम्राज्येनाभिषिञ्चाम्यसौ ॥
ॐ देवस्य त्वा सवितुः प्रसवेश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम्।
सरस्वत्यै व्याचो यन्तुर्यन्त्रेणाग्नेः साम्राज्येनाभिषिञ्चामि ॥
ॐ देवस्य त्वा सवितुः प्रसवेश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम्।
अश्विनोर्भैषज्येन तेजसे ब्रह्मवर्चसायाभिषिञ्चामि॥
सरस्वत्यै भैषज्येन व्वीर्य्यायान्नाद्यायाभिषिञ्चामि।
इन्द्रस्येन्द्रियेण वलाय श्रियै यशसऽभिषिञ्चामि ॥
2. ॐ आपो हि ष्ठा मयोभुवस्तान ऊर्जे दधातन। महेरणाय चक्षसे ॥
ॐ यो वः शिवतमो रसस्तस्य भाजयते ह नः। उशतीरिव मातरः।
ॐ तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ। आपो जनयथा च नः॥

हिन्दी अर्थ सहित दे रहे हैं। साधक प्रारम्भ में इसी से लाभ उठाकर भगवत् कृपा प्राप्त करें।[1]

3–सर्वविध यन्त्र-पूजन-विधि

1. ध्यान–जिस यन्त्र का पूजन करना हो, उसके अधिष्ठाता देव-देवी का सर्वप्रथम ध्यान करना चाहिए। ध्यान के समय दोनों हाथों की अञ्जलि बनाकर उसमें पुष्प रख लें और ध्यान का श्लोक बोलकर नमस्कार करते हुए अञ्जलि के पुष्प यन्त्र पर इस भावना से चढ़ाए कि देवता उसमें विराजमान हैं।

2. आवाहन–आगच्छेह महादेव! सर्वसम्पत्प्रदायक!। यावज्जपं समाप्येत तावत् त्वं सन्निधौ भव ॥ श्री.../बटुकभैरवदेवाय नमः। अस्मिन् यन्त्रे आवाहनं समर्पयामि

इतना बोलकर आवाहन के लिए पुष्प चढ़ाए।

3. आसन–प्रसीद जगतां नाथ संसारार्णव-तारक। मया निवेदितं भक्त्या आसनं प्रतिगृह्यताम्। श्री...बटुकभैरवदेवाय नमः, आसनं समर्पयामि।

यह बोलकर आसन के ऊपर पुष्प चढ़ाए।

4. पाद्य–गङ्गादि-सर्वतीर्थेभ्यो मया प्रार्थनाऽऽहृतम्। तोयमेतत्सुखस्पर्श पाद्यार्थं प्रतिगृह्यताम् ॥ श्री.../देवाय पाद्यं समर्पयामि।

इससे पाद्य के लिए जल चढ़ाए।

5. अर्घ्य–निधीनां सर्वदेवानां त्वमनर्घ्यगुणो ह्यसि। सारमेयस्थ देवेश! गृहाणार्घ्यं नमोऽस्तु ते ॥ श्री.../देवाय अर्घ्यं समर्पयामि।

6. आचमन–कर्पूरेण सुगन्धेन सुरभि स्वादु शीतलम्। तोयमाचमनीयार्थं देवेदं प्रतिगृह्यताम् ॥ श्री.../देवाय आचमनीयं समर्पयामि।

7. स्नान–मन्दाकिन्याः समानीतैर्हेमाम्भोरुहवासितम्। स्नानं कुरुष्व देवेश! सलिलैश्च सुगन्धिभिः ॥ श्री.../देवाय स्नानं समर्पयामि।

8. पञ्चामृतस्नान–पयोदधि घृतं चैव मधु शर्करायुतम्। पञ्चामृतं मयाऽऽनीतं स्नानार्थं प्रतिगृह्यताम् ॥ श्री.../देवाय पञ्चामृतस्नानं समर्पयामि।

---

1. यहां यदि किसी देवी के यन्त्र की पूजा कर रहे हों तो वहां 'महादेवि' ऐसा पद बदल कर पढ़ना चाहिए। इसी प्रकार अन्यत्र भी जहां देव लिखा हो, वहां! देवि ऐसा पद बदलकर बोलें।

9. उद्वर्तन-स्नान–नानासुगन्धिद्रव्यं च चन्दनं रजनीयुतम्। उद्वर्तनं मया दत्तं स्नानार्थं प्रतिगृह्यताम् ॥ श्री...देवाय उद्वर्तनं समर्पयामि तदनन्तरं स्नानंसमर्पयामि आचमनीयं च समर्पयामि।

10. वस्त्र तथा उपवस्त्र–पट्टकूलयुगं देव! शाटकेन समन्वितम्। परिधेहि कृपां कृत्वा, प्रसीद परमेश्वर ॥ श्री.../देवाय वस्त्रं उपवस्त्रं च समर्पयामि।

11. चन्दन–श्रीखण्डचन्दनं दिव्यं गन्धाढ्यं सुमनोहरम्। विलेपनं च देवेश! चन्दनं प्रतिगृह्यताम् ॥ श्री.../देवाय चन्दनं समर्पयामि।

12. अक्षत–अक्षतान् निर्मलान शुभ्रान् मुक्ताफलसमन्वितान्। गृहाणेमान् महादेव! देहि मे निर्मलां मतिम् ॥ श्री.../देवाय अक्षतान् समर्पयामि।

13. परिमल द्रव्य–हरिद्रां कुङ्कुमं चैव सिन्दूरं कज्जलं तथा।भक्त्या निवेदितं देव! गृह्यतां मङ्गलं कुरु ॥श्री.../देवाय परिमलद्रव्यं समर्पयामि।

14. पुष्पमाला आदि–मन्दारपारिजातादि-पाटला-केतकानि च। जातीचम्पकपुष्पाणि गृहाणेमानि शोभन। श्री.../देवाय पुष्पाणि समर्पयामि।

15. धूप–वनस्पतिरसोद्भूतो गन्धाढ्यो गन्ध उत्तमः। आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम् ॥ श्री.../देवाय धूपं समर्पयामि।

16. दीप–आज्यं च वर्तिसंयुक्तं वह्निना योजितं मया। दीपं गृहाण देवेश! त्रैलोक्यतिमिरापहम् ॥ श्री.../देवाय दीपं दर्शयामि।

17. नैवैद्य, फल आदि–अन्न चतुर्विध स्वादु रसैः षड्भिः समन्वितम्। नैवेद्यं गृह्यतां देव! भक्ति मे निश्चलां कुरु ॥ श्री.../देवाय नैवेद्यं फलं च समर्पयामि।

18. ताम्बूल (पान-सुपारी)–एलालवङ्गकस्तूरीकर्पूरैश्च सुवासितम्। ताम्बूलं मुखवासार्थमर्पयामि सुरेश्वर! ॥ श्री.../देवाय ताम्बूलं समर्पयामि।

19. दक्षिणा–पूजाफलसमृद्ध्यर्थं तवाग्रे द्रव्यदक्षिणा। स्थापिता तव प्रीत्यर्थं पूर्णान् कुरु मनोरथान्! ॥ श्री.../देवाय दक्षिणां समर्पयामि।

20. आरती–दीपवर्तिसमायुक्तं कर्पूरेण समन्वितम्। आरार्तिक्यं तव प्रीत्यै भक्त्या देव समर्पये ॥ श्री.../देवाय आरार्तिक्यं समर्पयामि।

21. पुष्पाञ्जलि–नानासुगन्धपुष्पाणि यथाकालोद्भवति च। पुष्पाञ्जलौ प्रदत्तानि

गृहाण परमेश्वर ॥ श्री.../देवाय पुष्पाञ्जलिं समर्पयामि।

22. प्रदक्षिणा–यानि कानि च पापानि जन्मान्तरकृतानि च। तानि सर्वाणि नश्यन्तु प्रदक्षिण-पदे पदे ॥

23. प्रार्थना–अपराध-सहस्राणि क्रियन्तेऽहर्निशं मया। दासोऽयमिति मां मत्वा क्षम्यतां परमेश्वर ॥ मन्त्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वर ॥ यत्पूजितं मया देव परिपूर्ण तदस्तु मे ॥

यह पूजाविधि अधिक न हो सके तो यन्त्र-पूजन अथवा यन्त्र-धारण करने से पूर्व एक बार अवश्य करें। बाद में मन्त्र न बोलकर केवल उनके नीचे लिखी हुई पंक्तियों को बोलकर ही पूजा कर लेनी चाहिए। ऐसा करने से मन की पवित्रता, वातावरण की शुद्धता, भावों की एकाग्रता तथा उत्साह की तीव्रता प्राप्त होती है। पूजा को उपासना का मुख्य अंग माना गया है। ऊपर बताई गई पूजा-विधि में सामान्यतः न्यूनाधिकता हो सकती हैं तथा मन्त्रों में भी पाठान्तर या अन्य मन्त्र भी बहुत से प्राप्त होते हैं। वैदिक मन्त्रों के द्वारा पूजा करने के इच्छुक 'पुरुषसूक्त' के सोलह मन्त्रों से पुरुष-देवों की और 'श्रीसूक्त' के सोलह मन्त्रों से स्त्रीदेवियों की पूजा करते हैं। नाममन्त्र अथवा इष्टमन्त्र से भी यह पूजा की जा सकती है। यदि यह पूजा करने में कोई साधक अपने को असमर्थ समझे तो किसी विद्वान् पुरोहित से करवा लें।

यो वै बटुकः स भगवान् यश्चद्यौस्तस्मै वै नमो नमः।
यो वै बटुकः स भगवान् यश्चापस्तस्मै वै नमो नमः।
यो वै बटुकः स भगवान् यश्च तेजस्तस्मै वै नमो नमः।
यो वै बटुकः स भगवान् यश्च कालस्तस्मै वै नमो नमः।
यो वै बटुकः स भगवान् यश्च मृत्युस्तस्मै वै नमो नमः।
यो वै बटुकः स भगवान् यश्चामृत्युस्तस्मै वै नमो नमः।
यो वै बटुकः स भगवान् यश्चाकाशस्तस्मै वै नमो नमः।
यो वै बटुकः स भगवान् यश्च विश्वं तस्मै वै नमो नमः।
यो वै बटुकः स भगवान् यश्चाशुक्लं तस्मै वै नमो नमः।
यो वै बटुकः स भगवान् यश्चादम्भस्तस्मै वै नमो नमः।
यो वै बटुकः स भगवान् यश्चादम्भस्तस्मै वै नमो नमः।
यो वै बटुकः स भगवान् यश्च सूक्ष्मं तस्मै वै नमो नमः।
यो वै बटुकः स भगवान् यश्च स्थूलं तस्मै वै नमो नमः।
यो वै बटुकः स भगवान् यश्चकृष्णस्तस्मै वै नमो नमः।

यो वै बटुकः स भगवान् यश्चाकृष्णस्तस्मै वै नमो नमः।
यो वै बटुकः स भगवान् यश्च सत्यं तस्मै वै नमो नमः।
यो वै बटुकः स भगवान् यश्च सर्वं तस्मै वै नमो नमः।

भूस्ते आदिर्मध्यं भुवः स्वस्ते शीर्षं विश्वरूपोऽसि ब्रह्मैकस्त्वं द्विधा त्रिधा बुद्धिस्त्वं शान्तिस्त्वं पुष्टिस्त्वं हुतमहुतं दत्तमदत्तं सर्वमसर्वं विश्वमविश्वं कृतमकृतं परमपरं परायणं च त्वम्। अपाम सोमममृता अभूमागन्म ज्योति-रविदाम देवान्। किं नूनमस्मान् कृणवदरातिः किमु धूर्तिरमृतं मर्त्यस्य। सोमसूर्य पुरस्तात् सूक्ष्मः पुरुषः। सर्वं जगद्धितं वा एतदक्षरं प्राजापत्यं सूक्ष्मं सौम्यं पुरुषं ग्राह्यमग्राह्येण भाव भावेन सौम्यं सौम्येन सूक्ष्मं सूक्ष्मेण वायव्यं वायव्येन ग्रसति स्वेन तेजसा तस्मादुपसंहर्त्रे महाग्रासाय वै नमो नमः।

हृदिस्था देवताः सर्वा, हृदि प्राणाः प्रतिष्ठिताः।
हृदि त्वमसि यो नित्यं, तिस्त्रो मात्राः परस्तु सः॥

तस्योत्तरतः शिरो दक्षिणतः पादौ य उत्तरतः स ओङ्कारो या ओङ्कारः स प्रणवो यः प्रणवः स सर्वव्यापी यः सर्वव्यापी सोऽनन्तो योऽनन्तस्तत्तारं यत्तारं तत्-सूक्ष्मं यत्सूक्ष्मं तच्छुक्लं यच्छुक्लं तद्वैद्युतं यद्वैद्युतं तत् परं ब्रह्म यत्परं ब्रह्म स एको य एकः स रुद्रो यो रुद्रः स ईशानो य ईशानः स भगवान् महेश्वरो यो भगवान् महेश्वरः भगवान् बटुकेश्वरो यो भगवान् बटुकेश्वरः।

अथ कस्मादुच्यत ओङ्कारो यस्मादुच्चार्यमाण एव प्राणानूर्ध्वमुत्क्रामयति तस्मादुच्यत ओङ्कारः। अथ कस्माच्यते प्रणवो यस्मादुच्चार्यमाण एव ऋग्यजुः सामाथर्वाङ्गिरसं ब्रह्म ब्राह्मणेभ्यः प्रणामयति नामयति च तस्मादुच्यते प्रणवः। अथ कस्मादुच्यते सर्वव्यापी यस्मादुच्चार्यमाण एव सर्वान् लोकान् व्याप्नोति स्नेहो यथा पललपिण्डमिव शान्तरूपमोतप्रोतमनुप्राप्तो व्यतिषक्तश्च तस्मादुच्यते सर्वव्यापी। अथ कस्मादुच्यतेऽनन्तो यस्मादुच्चार्यमाण एव तिर्यगूर्ध्वमधस्ताच्चारस्यान्तो नोपलभ्यते तस्मातेऽनन्तः। अथ कस्मादुच्यते तारं यस्मादुच्चार्यमाण एव गर्भ-जन्मव्याधिजरामरणसंसारमहाभयात् तारयति त्रायते च तस्मादुच्यते तारम्। अथ कस्मादुच्यते सूक्ष्मं यस्मादुच्चार्यमाण एव सूक्ष्मो भूत्वा शरीराण्यधितिष्ठति सर्वाणि चाङ्गान्यभिमृशति तस्मादुच्यते सूक्ष्मम्। अथ कस्मादुच्यते शुक्लं यस्मादुच्चार्यमाण एवं क्रन्दते क्लामयति च तस्मादुच्यते शुक्लम्। अथ कस्मादुच्यते वैद्युतं यस्मादुच्चार्यमाण एवाव्यक्ते महति तमसि द्योतयति तस्मादुच्यते वैद्युतम्। अथ कस्मादुच्यते परं ब्रह्म यस्मात् परमपरं परायणं च बृहद्बृहत्या बृंहयति तस्मादुच्यते परं ब्रह्म। अथ कस्मादुच्यत एको यः सर्वान् प्राणान् सम्भक्ष्य सम्भक्षणेनाजः संसृजति विसृजति तीर्थमेके व्रजन्ति तीर्थमेके दक्षिणाः प्रत्यञ्च

उदञ्चः प्राञ्चोऽभिव्रजन्त्येके तेषां सर्वेषामिह सद्गतिः। साकं स एको भूतश्चरति प्रजानां तस्मादुच्यत एकः। अथ कस्मादुच्यते रुद्रो यस्माद् ऋषिभिर्नान्यै र्भक्तैर्द्रुतमस्य रूपमुपळभ्यते तस्मादुच्य ते रुद्रः। अथ कस्मादुच्यत ईशानो यः सर्वान् देवानीशत ईशानीभिर्जननीभिश्च परमशक्तिभिः। अभित्वा शूर नोनुमोऽदुग्धा इव धेनवः। ईशानमस्य जगतः सुवर्द्दशमीशानमिन्द्र तस्थुषः। तस्मादुच्यत ईशानः। अथ कस्मादुच्यते भगवान् महेश्वरो यस्माद् भक्ता ज्ञाने-भजन्त्यनुगृहणाति च वाचं संसृजति विसृजति च सर्वान् भावान् परित्यज्यात्मज्ञानेन योगैश्वर्येण महति महीयते तस्मादुच्यते भगवान् महेश्वरः। अथ कस्मादुच्यते भगवान् वटुकेश्वरो यस्मादन्तर्जलौषधिवीरुधाना विश्येमं विश्वं भुवनानि वा अवते तस्मादुच्यते भगवान् वटुकेश्वर तदेतद् रुद्रचरितम्।

एको ह देवः प्रदिशो नु सर्वाः पूर्वोह जातः सउगर्भे अन्तः। स एव जातः स जनिष्यमाणः प्रत्यङ्जनास्तिष्ठति सर्वतो मुखः। एको वटुको न द्वितीयाम तस्मै य श्यान् लोकानीशत ईशनोमिः। प्रत्यङ्जनास्तिष्ठति सञ्चुकोचान्तकाले संसृज्य विश्वा भुवनानि गोप्ता ॥ यस्मिन् क्रोधं यां च तृष्णां क्षमां च, ह्यक्षमां हित्त्वा हेतुजालस्य मूलम्। बुद्धया सञ्चितं स्थापयित्वा तु रुद्रे, शाश्वतं वै रुद्रमेकत्वमाहुः॥

वटुको हि शाश्वतेन पुराणेन, वेषमूर्जेण तपसा नियन्ता ॥ अग्निरितिभस्म वायुरिति भस्म जलमिति भस्म स्थलमिति भस्म व्योमेति भस्म सर्वं ह वेदं भस्म मन एतानि चक्षूंषि यस्माद् व्रतमिदं पाशुपतं यद्भस्मनाङ्गानि संस्पृशेत् तस्माद् ब्रह्म तदेतद् वटुकं पशुपाश-विमोक्षणाय।

यस्मिन्निदं सर्वमोतप्रोतं तस्मादन्यन्न परं किञ्चनास्ति। न तस्मात् पूर्वं न परं तदस्ति, न भूतं नोत भव्यं यदासीत् ॥ अक्षराज्जायते कालः कालाद् व्यागक उच्यते। व्यापको हि भगवान् वटुको भोगायमानो यदा शेते रुद्रस्तदा संहरते प्रजाः। उच्छवासिते तमो भवति तमस आपोऽप्स्वङ्गुल्या मथिते मथितं शिशिरे शिशिरं मथ्यमानं फेनं भवति। फेनादण्डं भवत्यण्डाद् ब्रह्मा भवति ब्रह्मणो वायुर्वायोरोङ्कनर ओङ्कारात् सावित्री सावित्र्या गायत्री गायत्र्या लोकाः भवन्ति। एतद्धि परमं तपः। आपो ज्योती रसोऽमृतं ब्रह्मभुभुर्वः स्वरोम् नम इति।

य इमां वटुकोपनिषदं ब्राह्मणोऽधीतेऽश्रोत्रियः श्रोत्रियो भवति। अनुपनीत उपनीतो भवति। स ह्यग्नि-पूतो भवति। स वायुपूतो भवति। स सूर्यपूतो भवति। स सोमपूतो भवति। स सत्यपूतो भवति। स सर्वपूतो भवति। स सर्वेर्देवैरनुज्ञातो भवति। ससर्वैर्वेदैरनुध्यातो भवति। स सर्वेषु तीर्थेषु स्नातो भवति। स सर्वविद्भवति। स सर्वायुरारोग्यवान् भवति। स कालज्ञानी भवति। स गुर्वनुग्रह भवति इत्येवं भगवद् वटुकेश्वरं यः स्तौति स वेद्यं वदेति। इत्यथर्वणर हस्ये वटुकोपनिषदम्।

श्री बटुक-भैरव-लहरी

(अष्टोत्तर-शत-बटुक-भैरव-नाम-गर्भिता)

भजन्ते यद्भर्ग-प्रभव-भुवनाभोग-भरितं,
प्रभाभिर्भास्वन्तं भगवति भवे भावित-तनुम्।
भयार्त्ता भक्तायं भुवन-भय-भङ्गाय भुवि तं,
भजे भव्यैभविर्भवभयहरं 'भैरव'महम् ॥1॥

बिभेति क्लेशोऽस्मादथ जगदिदं भीषणतमाद्,
भयं विन्ते किं वा त्रिदिवपतयो विभ्यति यतः।
र वं भीमं कृत्वा दितिजगणमामर्दयति यः,
स 'भूतानां नाथः' किरतु करुणादृष्टि किरणान् ॥2॥

समूहं दुःखानां परिहरति यो भैरववरो,
भिया सर्वान् भीरून् रवयति तथा, रोदयति च।
विभर्ति स्वात्मानं भरति च जगत् सोऽतिमतिमान्,
विधत्तां 'भूतात्मा' मतिमलितमां तच्चरणयोः ॥3॥

अमेयात्मा नित्यं निजमतिमतामुन्नतिविधौ,
दयार्द्रः कृत्स्नानि क्वथयति कुकृत्यानि तरसा।
विधत्ते यः सत्यं शरणमुपयातं गतभयं,
स भव्यो 'भूतानां' हृदि विलसताद् 'भावन' इह ॥4॥

वपुश्चैतत् क्षेत्रं क्षिति-जल-हविर्वायु-नभसां,
समष्ट्या सम्पन्नं तदपि न विना क्षेत्रपतिना।
समर्थ सर्वोर्थे भवति भगवन्! भव्यद्! ततः,
सुरेशं 'क्षेत्रज्ञं' नमति न जनः कोऽत्र मतिमान् ॥5॥

रसां राज्यं रामां वपुरथ वयस्तत्त्वघटितं,
समष्टया व्यष्ट्या यो विकृतिसंहितं भूपतिरिव।
'अल पालं पालं स्वलति भुवि भक्तानविकलं,
स भद्रं 'क्षेत्राणा' मनवरत 'पालः' कलयतु ॥6॥

प्रभुर्वालो दीप्तः स्फटिक-सदृशः कुन्तलरुचा,
स्फुरद्वक्त्रो दिव्यैर्नवमणिगणैर्भासित-तनुः।
त्रिशूलं दण्डं च स्वकरयुगले धारणा परः,
प्रसादं भक्तेभ्यो वितरतु सदा 'क्षेत्रद' इह ॥7॥

सदोद्यत्सूर्याभस्त्रिनयनयुतः पाणिषु दधत्
कपालं शूलं चाभय-वरद-युग्मं स्मितमुखः।
अलङ्कारै रम्यैरपि विलसितः शोणवसनः,
क्षतात् त्रांतु सद्यो भवतु सदयः 'क्षत्रिय' वरः ॥8॥

सृणिं खड्गं पांश डमरुमभयं नागमसितं,
कपालं घण्टाञ्च स्वकरकमलैर्विभ्रदनिशम्।
नृमुण्डानां मालां शशधरकलां पिङ्गचिकुरान्,
दर्धानो दिग्वासाः सकल-सुखदाताऽवतु 'विराट्' ॥9॥

शवोभूत्वा यस्मिन् प्रलय-समये भूतनिवहः,
स्वयं शेते किं वा विजनवसतौ निष्ठति च यः।
अहङ्कारे काश्यां वसति सितसानौ हिमगिरेः,
'श्मशाने वासी' मे शमयतु स नित्यं यमभयम् ॥10॥

सदा मां लक्ष्मीं यः स्यति विकुरुरते दुर्व्यसनिनं,
तमश्नात्याहोस्वित् कुसृतिरहितैर्ज्ञानसहितैः।
सुभक्तैः प्राप्तव्यो निजजन-रिपूणामपि तथा,
स 'मांसाशी' मांसं मम रिपुगणस्यात्तु सततम् ॥11॥

विधत्ते यो धातुर्दुहितृकमितुः पञ्चम-शिरः-
कपाले रुद्रः सन्नशनमथवा यः रवरपरम्।
स्वयं रामो भूत्वा दशवदनमर्वत्यपि स 'रव-
र्पराशी' दत्त्वाशीर्वचनमघनाशी भवतु नः ॥12॥

तनीयस्या स्मृत्याऽप्यहमतनुरुद्भूय मनसि,
प्रकामं वैकल्यं सपदि जनयामीत्यतिमदात्।
तपस्यन्तं शम्भुं वशयितुमथैच्छद् हृदि तदा,
'स्मरस्यान्तं' कृत्वा ह्यगमद्भिधामन्तकमयीम् ॥13॥

सुराणां मर्त्यानां चरण-शरणं संश्रितवतां,
दयापारावारो दमयति दलं द्वेषणरतम्।
तथाप्युद्दामा ये प्रशममुपयान्तीह न तदा,
पिवंस्तेषां रक्तं भवति बटुको 'रक्तप' इति ॥14॥

जलेनेन्द्रो भूत्वाजगदिमलं पाति कृपया,
तथाऽज्ञानं पानं हरति परितो राति सुमतिम्।

कदाचिल्लोकानां विकृतिमति-दृष्टया पिबति यो,
मुदेऽसौ मद्यं वा मदयति तदा 'पानप' वरः ॥15॥

सदा सद्भिः सेव्यः सकलवसुधाऽऽसेचनपरः,
सुराराध्यः साध्यः सरलसरलैः स्वान्त-रसितैः।
सुसंस्कारैः सिक्तान् स्वजन-सहितान् साधु विदधत्,
स्वयं सिद्धः 'सिद्धः' सततमवतात् सिद्ध-सहितः ॥16॥

सकामं स्मर्तृभ्यो दिशति रुचिमत्सिद्धिमतुलां,
भजद्भ्यो निष्कामं वितरति तथा मुक्तिममलाम्।
अखण्ड-ब्रह्माण्ड-प्रथित-महिमोद्यद्द्युतिमयी,
यतः सर्वा सम्पद् विलसति सदा 'सिद्धिद'-विभौ ॥17॥

अयन्ते तत्रैव प्रसभमखिलाः किन्तु मधुपाः,
प्रफुल्लः पुष्पौघो भवति मधुभृद् सरसः।
निधानं सिद्धीनां लसति हि तथैवात्र बटुके,
समृद्धैः सत्-'सिद्धैः' शुभति सततः 'सेवित' इह ॥8॥

मुखद्वारे पूज्यः प्रथममहि कङ्काल-बटुक-
स्तृतीयेनाक्ष्णा स क्रुधमुपगतः शोषयति कम्।
सुखञ्चात्मीयानां कलयति करालोऽपि नितरां,
स 'कङ्काल' कङ्केष्ववलति च शिरोऽजस्य चुटति ॥19॥

जगज्जाले कालः प्रबल इति लोकोऽपि मनुते,
बलं स्वीयं क्षीणं हतमतिरलं हन्त! तनुते।
धृतव्यालो भाले लसदमृतसूः शूलधरणः,
परं तस्यापीशो जयति नहि किं 'कालशमनः'? ॥20॥

कलानां याः काष्ठा बटुक-वपुषस्ताः परिणता-
स्तथा दिङ्नाथः सन्निह हि सकलास्ताः स तनुते।
कलातीता कल्या कलुषमखिलं सा क्षपयतात्,
'कलाकाष्ठा रूपा त्रिदश-महिता तस्य च 'तनुः।' ॥21॥

सिता श्यामा रक्ता स्फुरित-वपुषो राजति छवि-
र्विपद्भूभृद्भित्त्यै भवति निजभक्तस्य च पविः।
जडानां जाड्यं यः प्रखर-किरणैरस्यति रवि-
मुदिस्ताच्छास्त्राणां चयमपि बटुः कौति स 'कविः' ॥22॥

त्रयी-गीतः प्रीतः पशुपतिरधीशस्त्रि जगतां,
गुणातीतः शीतद्युतिकर कलालङ्कृत जटः।
महादेवो दुष्टग्रह कृत-सपत्राकृतिहर-
'स्त्रिनेत्र' स्त्राता मे जगति न परः कोऽपि विबुधः ॥23॥

लघून् स्थूलान् सूक्ष्मान् किमणु-परमाणूनथ ततो-
ऽप्यतीव क्षीणान् यः करबदरवत् पश्यति सदा
अतो लोकः स्तोकः प्रथितमहिमा तं प्रति यतः,
प्रणामैः सम्प्रीणन् गदति 'बहुनेत्रः' कृपयतु ॥24॥

त्रिलोक्यां यद्भक्तान् दनुजचरिताः के चन यदा,
व्यथन्ते तान् हन्तुं स इह नयने पिङ्गलयति।
सदा ते ते दृष्ट्वा सपदि विलयं यान्ति तदनु,
ब्रुवन्तीशं तं 'पिंङ्गलपद्युतो 'लोचन' इति ॥25॥

सदा पाणौ शूलं वहति भगवान् भैरव इति,
प्रतीत्या निश्चिन्ता यजन-भजन-ध्यान-निरताः।
प्रभोर्भक्तौ रक्ता द्रुतमिह लभन्तेऽभिलषितान्,
स आस्ते श्री 'शूल' स्थिति-परिलसत्-'पाणि' महिमा ॥26॥

समर्थानां सार्थं सुखयति समन्तादसुमतां,
स्वकीयानां सृष्टिं सरसमथ सौम्यं निशमनम्।
परं विश्वासार्थं बटुक! भवता योऽतिनिशितो,
धृतः 'खड्गः पाणौ' स हि भवति तेषामिह न किम्? ॥27॥

अयं देवः क्रूरः किमु समितिशूरः किमथवा,
कृपापूरोऽदूरः शरणमुपनीताय किमु वा?
सुसंवित्त्यै सूरः प्रथितचरितो विस्मयकरः
स कङ्काली शङ्कावलिमपनयत्वाशु वितताम् ॥28॥

तमस्यात्मानं यः परिणमयते स्वेप्सित धिया।
तदा धूम्रे कृत्वा दहनसदृशो लोचनवरे।
निहन्ति प्रच्छन्नान् दनुज-मनुजान दुष्टमतिका-
नतो 'धूम्र'-प्रख्यः' स जयति तथा लौचन युतः ॥29॥

कुतोऽपि स्वामी मे स हि नहि विभेतीति सुदृढ़ं,
हृदि स्वे मन्वानान् बटुक-मनुजापार्पित हृदः।

ततो विघ्नैर्निघ्नान् क्वचिदपि विलोकैयष भगवा-
नियर्ति स्वान् भक्तानवितुमभितो'ऽभीरु'रनिशम् ॥30॥

क्षितौ डाकिन्याद्या विविधधृत देहाः परिवृता,
व्यथन्ते जीवान् याः कुलिश हृदया नाथयति ताः।
अनाथानां नाथो भयजनकशब्दोद्गिरणकृद-
रव-प्रोद्यद्भैरव्युदित-गणनाथो ह्यवतु सः ॥31॥

अघोर-भट्टारक स्वच्छन्दनाथ/श्रीबहुरूप भैरव

भगवान् परमशिव के अनन्त नाम और अनन्त रूप हैं। उन्हीं में से एक हैं 'स्वच्छन्द भैरव/श्रीबहुरूप भैरव'। काश्मीर शैवदर्शन की साधना में विशेषतः प्रचलित श्रीस्वच्छन्दभैरव की साधना का महत्व अतिव्यापक है। उधर के महनीय तन्त्र-ग्रन्थों में स्वच्छन्द भैरव की साधना-विधि भी पर्याप्त महत्व को प्राप्त है। वहीं उनके ध्यान के लिए उनके स्वरूप का परिचय दिया गया है जिसमें भगवान् स्वच्छन्द भैरव के आकार और आयुधों की चर्चा विशेष रूप से हुई हैं। आकार की दृष्टि से श्रीस्वच्छन्दनाथ के पांच मुख, प्रत्येक मुख पर तीन-तीन नेत्र, जटा मुकुट मण्डित, चन्द्रकोटि प्रकाश, कपालमालाभरण, सर्पादि विषैले जीवों का धारण तथा अष्टादश भुजाएं हैं। श्रीशारिकादेवी इनकी भैरवी है और यह भी इन्हीं के समान आकारादि धारण करती है। आयुध खड्गादि भी अठारह हैं।

इन सभी का आध्यात्मिक तत्व और भी महत्वपूर्ण हैं जिनका परिशीलन करने से—चिद्रूप भैरव, चिद्, आनन्द, इच्छा, ज्ञान और क्रिया रूप पांच मुख, इन मुखों पर सृष्टि, स्थिति, संहाररूप क्रियाओं की शक्ति का विस्तार, वामा, ऐश्वर्यादि शक्तियों का जटा-मुकुट, विश्व को आप्यायित करने वाली अमृतकला का धारण, अन्तर्लक्ष्य एवं बाह्यदृष्टि आदि की आध्यात्मिकता का सूक्ष्म परिज्ञान हो सकता है। इन्हीं सब दृष्टियों से यहाँ हम 1. स्वच्छन्दभैरव स्मरण तथा 2. श्रीबहुरूप-गर्भ स्तोत्र का सार्थ प्रकाशन कर रहे हैं। साधक इनके पाठ द्वारा लाभ प्राप्त करें।

स्वच्छन्द-भैरव-स्मरणम्

त्रिपञ्च-नयनं देवं, जटा-मुकुट-मण्डितम्।
चन्द्र-कोटि-प्रतीकाशं, चन्द्रार्ध-कृत-शेखरम् ॥1॥
पञ्चवक्त्रं विशालाक्षं, सर्प-गोनास-मण्डितम्।
वृश्चिकैरग्नि-वर्णाभैर्हरिण तु विराजितम् ॥2॥
कपालमालाभरणं, मुण्ड-खेटक-धारिणम्।
पाशाङ्कुशधरं देवं, शरहस्तं पिनाकिनम् ॥3॥

वरदाभय-हस्तं च, खड्ग-खट्वाङ्गधारिणम्।
वीणा-डमरूहस्तं च, घण्टाहस्तं त्रिशूलिनम् ॥4॥

वज्र-दण्ड-कृताटोपं, परश्वायुध-हस्तकम्।
मुद्गरेण विचित्रेण, वर्तुलेन विराजितम् ॥5॥

सिंहचर्म-परीधानं, गजचर्मोत्तरीयकम्।
अष्टादशभुजं देवं, नीलकण्ठं सुजेतसम् ॥6॥

ऊर्ध्ववक्त्रं महेशानि, स्फटिकाभं विचिन्तये।
आपीतं पूर्ववक्त्रं तु, नीलोत्पल-दल-प्रभगृ ॥7॥

दक्षिणं तु विचिन्त्याहं, वामं चैव विचिन्तये।
दाडिमी-कुसुमप्रख्यं, कुङ्कुमोदक-सन्निभम् ॥8॥

चन्द्रार्बुद-प्रतीकाशं, पश्चिमं च विचिन्तये।
स्वच्छन्दभैरवं देवं, सर्वकाम-फल-प्रदम् ॥9॥

यादृशं भैरवं रूपं, भैरव्यास्ताहगेव हि।
श्रीमद्भैरवनाथस्य, तस्मोसङ्गे विराजिताम् ॥10॥

ईषत्कराल-वदनां, गम्भीर-विपुल-स्वनाम्।
प्रसन्नास्यां सदा ध्याये, भैरवीं विस्मितेक्षणाम् ॥11॥

स्वच्छन्दभैरवं चैवमघोरां शक्तिमुत्तमाम्।
ध्यायन् भक्त्या तु युक्तात्मा, क्षिप्रंसिद्धयति मानवः ॥12॥

भगवान स्वच्छन्द भैरव-पन्द्रह नेत्रधारी, जटा-मुकुट से मण्डित, करोड़ों चन्द्रों के समान, जटा में अर्धचन्द्र को धारण किये हुए, पञ्चवक्त्र, विशालनेत्र, गोमुख-सर्पों से विभूषित, गले में लाल-लाल बिच्छुओं के हार से सुशोभित, कपालमालाधारी, अष्टादश भुजाओं में क्रमशः—1. मुण्ड, 2. खेटक, 3. पाश, 4. अङ्कुश, 5. बाण, 6. धनुष, 7. वरदमुद्रा, 8. अभयमुद्रा, 9. खड्ग, 10. खट्वाङ्ग, 11. वीणा, 12. डमरू, 13. घण्टा, 14. त्रिशूल, 15. वज्र, 16. परशु, 17. मुद्गर तथा 18. चक्ररूप आयुध लिये हुए, सिंह के चर्म का अधोवस्त्र, गजचर्म का दुपट्टा पहने हुए, अष्टादशभुजाधारी, दिव्य, नीलकण्ठ और परमतेजस्वी हैं। उनका ऊर्ध्वमुख अतिप्रभावशाली, स्फटिक के समान स्वच्छ पूर्वमुख पीतवर्णी दक्षिणमुख नील कमलपत्र के समान कान्तिवाला, वाम मुख, दाडिम-पुष्प और केसरिया जल के समान तथा पश्चिम मुख अनन्त चन्द्रमा

की कान्तिवाला है। ऐसे सर्व-कामनाओं के पूरक भगवान स्वच्छन्द भैरव का मैं ध्यान करता हूं ॥1-9॥

जैसा भैरव का रूप है, वैसा ही भैरवी का भी रूप है। वह भगवती भैरवी श्रीभैरवनाथ के अंक में विराजित ऐसी किंचित कराल-मुखी, गम्भीर तथा विपुल शब्दवाली, प्रसन्नवदना और विस्मित नेत्रवाली भैरवी का मैं ध्यान करता हूं ॥10-11॥

ऐसे स्वच्छन्द भैरव और उत्तम अघोर शक्ति का भक्तिपूर्वक ध्यान करता हुआ साधक शीघ्र सिद्ध हो जाता है—सिद्धि को प्राप्त करता है ॥12॥

श्रीबहुरूपगर्भ-स्तोत्रम्

ॐ ब्रह्मादि-कारणातीतं स्वशक्त्यानन्दनिर्भरम्।
नमामि परमेशानं स्वच्छन्दं वीरनायकम् ॥1॥

प्रणति-मंगल—ॐ ब्रह्मादि देवों के कारण से रहित, स्वशक्ति के साथ आनन्द में लीन, परमशिवस्वरूप, स्वच्छन्द वीर नामक भगवान् अघोरभट्टारक को मैं प्रणाम करता हूं ॥1॥

कैलासशिखरासीनं देवदेवं जगद्गुरुम्।
पप्रच्छ प्रणता देवी भैरवं विगतामयम् ॥2॥

स्तोत्रावतरणिका—किसी समय कैलास-शिखर पर विराजमान प्रसन्नचित्त, देवाधिदेव, जगद्गुरु, श्रीस्वच्छन्दभैरव को प्रणाम करके भगवती जगदम्बा ने उनसे पूछा ॥2॥

श्रीदेव्युवाज

प्रायश्चित्तेषु सर्वेषु समयोल्लङ्घनेषु च।
महाभयेषु घोरेषु तीव्रोपद्रवभूमिषु ॥3॥
छिद्रस्थानेषु सर्वेषु सदुपायं वद प्रभो।
येनायासेन रहितो निर्दोषश्च भवेन्नरः ॥4॥

श्रीदेवी ने कहा—हे प्रभो! सभी प्रकार के प्रायश्चित्त, समय (शास्त्र-आचार) का उल्लंघन, तीव्र उपद्रवों की स्थिति तथा सर्वविध दोषस्थानों के विद्यमान रहने पर भी साधक सरलता-पूर्वक उन दोषों से मुक्त होकर साधना कर सके ऐसा कोई उत्तम उपाय बतलाइये।

श्रीभैरव उवाच

शृणु देवि परं गुह्यं रहस्यं परमाद्भुतम्।
सर्वपाप-प्रशमनं सर्वदुःख-निवारणम् ॥5॥
प्रायश्चित्तेषु सर्वेषु तीव्रेष्वपि विशोधनम्।
सर्वच्छिद्रापहरणं सर्वार्ति-विनिवारकम् ॥6॥
समयोल्लङ्घने घोरे जपादेव विमोचनम्।
भोग-मोक्षप्रदं चैव सर्वसिद्धि-फलावहम् ॥7॥

श्रीभैरव ने कहा—हे देवि! परम गुप्त, परम अद्भुत रहस्यरूप, सर्वविध पापों का शमन करने वाला, सर्व दुःखों का निवारक, सभी प्रकार के तीव्र अथवा सामान्य प्रायश्चित्तों का शोधक, सर्वविध त्रुटियों को दूर करने वाला, समस्त पीड़ाओं का निवारक, घोर समय-शास्त्र के आचार का उल्लंघन होने पर भी केवल जप-मात्र से ही उसके दोष से मुक्त कराने वाला, भोग एवं मोक्ष का दाता और सर्वसिद्धिप्रद ऐसे (श्रीबहुरूपगर्भ) स्तोत्र को मैं कहता हूं. इसे तुम सावधान होकर सुनो।

शतजाप्येन शुद्ध्यन्ति, महापातकिनोऽपि ये।
तदर्धं पातकं हन्ति तत्पादेनोपपातकम् ॥8॥

स्तोत्र-जप (पाठ) का माहात्म्य—इस (मेरे द्वारा प्रोक्त-श्रीबहुरूपगर्भस्तोत्र) का सौ बार जप (पाठ) करने से जो महापापी हैं, वे भी शुद्ध हो जाते हैं। पचास बार पाठ करने से पाप का नाश होता है तथा पचीस बार पाठ करने से उपपातकों का नाश होता है ॥8॥

कायिकं वाचिकं चैव मानसं स्पर्शदोषजम्।
प्रमादादिच्छया वापि सकृज्जाप्येन शुद्ध्यति ॥9॥

प्रमादवश अथवा इच्छापूर्वक किये गये कायिक, वाचिक, मानसिक और स्पर्श के कारण उत्पन्न दोष इस स्तोत्र के एक बार पाठ करने से ही दूर हो जाते हैं।

यागारम्भे च यागान्ते पठितव्यं प्रयत्नतः।
श्रोतव्यं च सदा भक्त्या परं स्वस्त्ययनं महत् ॥10॥

पूजा अथवा यज्ञ आदि कर्मों के आरम्भ और अन्त में इस स्तोत्र का पाठ करना चाहिए तथा भक्तिपूर्वक इसका श्रवण करना चाहिए। यह स्तोत्र अत्युत्तम एवं कल्याण करने वाला है।

नित्ये नैमित्तिके काम्ये परस्याप्यात्मनोऽपि वा।
निश्छिद्रकरणं प्रोक्तमभावपरिपूरकम् ॥11॥

यह स्तोत्र किसी अन्य यजमान के लिए अथवा स्वयं के लिए किए जाने वाले नित्य, नैमित्तिक एवं काम्यकर्मों में अज्ञानवश रह जाने वाली त्रुटियों के दोषों को दूर करने वाला औंर अभावों की पूर्ति करने वाला कहा गया है।

द्रव्यहीने मन्त्रहीने ज्ञानयोग-विवर्जिते।
भक्तिश्रद्धा-विरहिते शुद्धिशून्ये विशेषतः ॥12॥
मनो-विक्षेपदोषे च विलोमे पशुवीक्षिते।
विधिहीने प्रमादे च जप्तव्यं सर्वकर्मसु ॥13॥

द्रव्यहीन, मन्त्रहीन, ज्ञान एवं योग से रहित और भक्ति तथा श्रद्धा से शून्य कर्म करने की स्थिति में एवं शुद्धता का अभाव, मन की अस्थिरता, विपरीत क्रिया, पशु (आचार शून्य-व्यक्ति द्वारा) दृष्ट, विधि रहित तथा प्रमाद के कारण हुई त्रुटियों के होने से उत्पन्न दोषों की निवृत्ति के लिए सभी कर्मों में इस स्तोत्र का पाठ करना चाहिए।

नातः परतरो मन्त्रो नातः परतरः स्तवः।
नातः परतरा काचित् सम्यक् प्रत्यङ्गिरा प्रिये! ॥14॥

हे प्रिये! इस स्तोत्र से बढ़कर न तो कोई मन्त्र है और न स्तोत्र। तथा इससे अधिक महत्ववाली कोई उत्तम प्रत्यङ्गिरा (कृत्यादिदोषशमनी विद्या) भी नहीं है।

इयं समग्रविद्यानां राजराजेश्वरीश्वरि!।
परमाप्यायनं देवि! भैरवस्य प्रकीर्तितम् ॥15॥

हे ईश्वरी! यह स्तोत्रविद्या समस्त विद्याओं की राजराजेश्वरी है, तथा यह स्तोत्र भैरव को पूर्णतः सन्तुष्ट करने वाला कहा गया है।

प्रीणनं सवदेवानां सर्व-सौभाग्य-वर्धनम्।
स्तवराजमिमं देवि शृणुष्वावहिता प्रिये ॥16॥

हे प्रिय देवी, सभी देवताओं को प्रसन्न करने वाले तथा सर्वविध सौभाग्य को बढ़ाने वाले इस 'बहुरूपगर्भ-स्तवराज' को सावधान होकर सुनो ॥16॥

अथ विनियोग : अस्य श्रीमदघोरभट्टारक-सकल-स्वच्छन्द-भैरवमन्त्रस्य श्रीकालाग्निरुद्रभैरव ऋषिः पङ्क्तिश्छन्दः सकलभट्टारकाघोरमूर्तिर्देवता ॐ बीजं, ह्रीं शक्तिः, कुरु कुरु कीलकं, श्रीबहुरूपगर्भप्रीत्यर्थं पाठे विनियोगः।

इस अघोरभट्टारक, सकल-स्वच्छन्द भैरव मन्त्र (स्तोत्र) के कालाग्नि-भैरव ऋषि, पङ्क्ति छन्द, सकल भट्टारक अघोरमूर्ति देवता, ॐ बीज, ह्रीं शक्ति और कुरु कुरु कीलक हैं। भगवान् बहुरूपगर्भ की प्रसन्नता के लिए मैं पाठ करता हूं, ऐसी भावना करके संकल्प जल छोड़ दे।

ध्यानम्

वामे खेटकपाशशार्ङ्गविलसद्-दण्डं च वीणाष्टिके,
विभ्राणं ध्वजमुद्गरौ स्वनिभदेव्यङ्कं कुठारं करे।
दक्षेऽप्यङ्कुशकन्दलेषु-डमरून् वज्रं त्रिशूलाभयान्,
रुद्रस्थं शरवक्त्रमिन्दुधवलं स्वच्छन्दनाथं स्तुमः ॥

रुद्र के पृष्ठ पर विराजमान, पञ्चमुख, चन्द्रमा के समान गौरवर्ण, अपने ही समान स्वरूपवाली देवी स्वच्छन्द भट्टारक शक्ति जिसके अङ्क में स्थित है तथा जो बायें हाथ में—'1. खेटक, 2. पाश, 3. धनुष, 4. दण्ड, 5. वीणा, 6. क्षुद्रघण्टिका, 7. ध्वज, 8. मुद्गर एवं 9. वरदमुद्रा' तथा उसी प्रकार दायें हाथ में—'1. परशु, 2. अङ्कुश, 3. इक्षुकाण्ड बाण, 4. डमरू, 5. वज्र, 6. त्रिशूल, 7. अभयमुद्रा, 8. मुण्ड तथा 9. खट्वाङ्ग' आयुध धारण किये हुए हैं, ऐसे भगवान स्वच्छन्दनाथ भैरव की हम स्तुति/ध्यान करते हैं।'

मूल-स्तोत्रपाठ—

ॐ नमः परमाकाशशायिने परमात्मने।
शिवाय परसंशान्त-निरानन्दपदाय ते ॥1॥

परमशिवात्मिका स्वभित्ति स्वशक्ति में विश्राम करने वाले, परम शान्त एवं अक्षुब्ध, आणवोपायगत उच्चाराभ्यास में साक्षात्कारणीय, छह आनन्द की भूमिकाओं में से द्वितीय भूमिका द्वारा प्राप्य, निरानन्दपदरूप तथा महाप्रकाशमय, निजस्वरूप परामर्शात्मा सदाशिव के लिए नमस्कार हो।

अवाच्यायाप्रमेयाय प्रमात्रे विश्वहेतवे।
महासामान्यरूपाय सत्तामात्रैकरूपिणे ॥2॥
घोषादि-दशधा शब्द-वीजभूताय शम्भवे।
नमः शान्तोग्रघोरादि-मन्त्रसन्दर्भगर्भिणे ॥3॥

विकल्पात्मक विज्ञान द्वारा अगोचर अथवा नादरूप, निर्विकल्पात्मक विज्ञान द्वारा अपरिच्छेद्य, प्रमाता, समस्त ज्ञेयमात्र माया से क्षिति-पर्यन्त विश्व को स्वेच्छा से स्वाश्रय में उन्मीलन करने से उसके कारणभूत, अत्यन्त असामान्यरूप प्रकाश-मात्ररूप होने के कारण सत्तामात्रैकवेद्य तथा घोषादि दशविध शब्द-नाद के आदिकारण अथवा अनाहत ध्वनि के परमार्थ रूप महामन्त्र के वीर्यरूप; स्वच्छन्द, निष्कल, अशेष विश्व की समरसता से वेद्य शिरोरूपाकार कला के द्वारा घोरतर शक्तिचक्र के क्रम से—ब्रह्मा, विष्णु और रुद्र; पार्थिव, प्राकृत एवं मायीय अण्ड; जागर, स्वप्न तथा सुषुप्त; प्रमेय, प्रमाण

और प्रमाता के सृष्टि-स्थिति-संहार-विलयरूप भेदों के द्वारा दृश्यमान जगत् जिसमें अभेदरूप से स्थित है ऐसे भगवान् बहुरूप, शान्त, उग्र-घोरादि-मन्त्रों के सन्दर्भ से गर्भित सदाशिव के लिए नमस्कार हो।

रेवतीसङ्गविस्रम्भ-समाश्लेष-विलासिने।
नमः समरसास्वाद-परानन्दोपभोगिने ॥4॥

'र च ई च ते रे' अथवा 'र च ई च यौं' बीजमन्त्र वर्णों में निहित रे वर्णद्वय अथवा र और य वर्ण जिसमें विद्यमान हैं, ऐसी रेवती शक्ति के विभ्रमरूप सामरस्य से तन्मयतारूप विलास करने वाले तथा समरसास्वाद परमानन्द के उपभोक्ता शिव के लिए नमस्कार हो।

भोगपाणे नमस्तुभ्यं योगेशीपूजितात्मने।
द्वय-निर्दलनोद्योग-समुल्लासितमूर्तये ॥5॥

योगेशी अथवा योगेशों द्वारा पूजित तथा शक्ति और शक्तिमान् के भेद का खण्डन-निर्दलन करने की प्रवृत्ति के कारण समुल्लासित स्फूर्तिशाली भैरव शक्ति-रूप के लिए नमस्कार हो ॥5॥

थरत्प्रसरविक्षोभ-विसृष्टाखिलजन्तवे।
नमो मायास्वरूपाय स्थाणवे परमेष्ठिने ॥6॥

शान्त, परमशिव तथा अनुत्तरमूर्ति की जगत् निर्माणरूप इच्छा से जो विस्तृत विक्षोभ हुआ उससे अखिल जीव सृष्टि करने वाले मायास्वरूप, अविचल; अविनश्वर तथा परमपद में स्थित भगवान 'बहुरूप' के लिए नमस्कार हो।

घोरसंसारसम्भोगदायिने स्थितिकारिणे।
कलादिक्षितिपर्यन्तं पालिने विभवे नमः ॥7॥

अत्यन्त भयानक संसाररूप कष्ट के अनन्त प्रकाशमय सुख-दुःखादि का उपभोग कराने वाले, स्थितिनामक परेश्वर की कृत्या-विशेष के कर्ता अथवा संसार के रूप में निजरूप को व्यक्त करने वाले, कला से पृथिवी तत्त्व पर्यन्त मायीय तत्त्व वर्ण के पालक और स्वल्पकाल के लिए उसके स्थापक तथा स्वयं संसरण रहित अथवा संसरण शील भगवान बहुरूप के लिए नमस्कार हो ॥7॥

रेहणाय महामोहध्वान्तविध्वंसहेतवे।
हृदयाम्बुजसङ्कोचभेदिने शिवभावने ॥8॥

प्रकाशात्मा महामोहरूप अज्ञानान्धकार का विध्वंस करने में कारणभूत तथा हृदय-कमल को विकसित करने वाले शिवरूपी सूर्य के लिए नमस्कार हो।

भोग-मोक्ष-फलप्राप्ति-हेतु-योग-विधायिने।
नमः परम-निर्वाण-दायिने चन्द्रमौलये ॥9॥

भोग और विद्याविद्येश्वरत्व-प्राप्तिरूप मोक्ष की प्राप्ति के लिए संयोग बनाने वाले, सायुज्य प्राप्ति रूप परम निर्वाण के दाता एवं विश्व को सिक्त करने वाली 'अमा'-नामक अमृत कला रूप चन्द्र को सिर पर धारण करने वाले चन्द्रमौलि भगवान स्वच्छन्दनाथ के लिए नमस्कार हो।

घोष्याय सर्वमन्त्राणां सर्ववाङ्मयमूर्त्तये।
नमः शर्वाय सर्वाय सर्वपापाहारिणे[1] ॥10॥

मनन एवं त्राण-स्वभावात्मक समस्त मन्त्रों द्वारा सम्बोध्य, परविमर्शरूप विश्वात्मक अखिल विमर्श के बीजभूत—'विमर्शात्मक वाक्तत्त्वरूप' सर्व वाङ्मय मूर्ति, सर्वपाप निवारक, सृष्टि, स्थिति एवं संहार-कर्ता तथा सभी के शरणभूत भेदमय मायीयस्वरूप (श्रीस्वच्छन्दनाथ) के लिए नमस्कार हो।

रवणाय रवान्ताय नमस्तेऽरावराविणे।
नित्याय सुप्रबुद्धाय सर्वान्तरतमाय ते ॥11॥

नाद, नादान्त, अनाहत, नित्य, सुप्रबुद्ध एवं सर्वान्तरतम—सर्वान्तर्यामी के लिए नमस्कार हो।

घोष्याय परनादान्तश्चराय खचराय ते।
नमो वाक्पतये तुभ्यं भवाय भवभेदिने ॥12॥

घोषणीय, परनाद के अधिष्ठाता, भावशून्य में विचरण करनेवाले, वाणी के स्वामी, संसाररूप शिव तथा संसार के बन्धन से छुड़ाने वाले प्रभु; बहुरूप के लिए नमस्कार हो।

रमणाय रतीशाङ्गदाहिने चित्रकर्मणे।
नमः शैलसुताभर्त्रे विश्वकर्त्रे महात्मने ॥13॥

समस्त चराचर में रमण करने वाले, कामदेव को भस्म करने वाले, अनन्त प्रकार की विचित्रता से युक्त सृष्टि, स्थिति, संहार, निग्रह और अनुग्रहरूप कर्म वाले, पार्वती के पति, विश्व के कर्ता एवं महात्मा (श्रीस्वच्छन्दनाथ) के लिए नमस्कार हो।

नमः पारप्रतिष्ठाय सर्वान्तपदगाय ते।
नमः समस्ततत्त्वाध्य-व्यापिने चित्स्वरूपिणे ॥14॥

स्वप्रकाशरूप, सर्वोपाधि रहित, छत्तीस तत्त्व; पद, मन्त्र, वर्ण, भुवन, तत्त्व और कलात्मक छह अध्वों में प्राप्त तथा चित्स्वरूप के लिए नमस्कार हो।

रेवद्धराय रुद्राय नमस्तेऽरूपरूपिणे।
परापरपरिस्पन्द-मन्दिराय नमो नमः ॥15॥

---

1. पाठांतर—सर्वपाशापहारिणे

रे अथवा र-य वर्णबीजवालों में उत्कृष्ट, रुद्र, रूपातीत, चिन्मय, शान्त एवं उदित शक्ति-स्वभाव के विश्रान्ति स्थान के लिए नमस्कार हो।

भरिताखिलविश्वाय योगगम्याय ते नमः।
नमः सर्वेश्वरेशाय महाहंसाय शम्भवे ॥16॥

अपनी ऐश्वर्य शक्ति से अखिल विश्व का भरण-पोषण करने वाले चराचर-रूप, चित्तवृत्ति निरोधरूप योग के द्वारा ज्ञेय एवं प्राप्त, सर्वेश्वर एवं महाहंस चिद्रूप भगवान् शिव के लिए नमस्कार हो।

चर्च्याय चर्चनीयाय चर्चकाय चराय ते।
रवीन्दु-सन्धिसंस्थाय महाचक्रेश ते नमः ॥17॥

स्मरणीय चर्चा-परामर्श के योग्य, चेतन-स्वभाव, स्पन्दात्मा तथा प्राणापान की सन्धि में स्थित अथवा प्राणापानरूप उभय मार्गगामी हे महाचक्रेश! आपके लिए नमस्कार हो।

सर्वानुस्यूत-रूपाय सर्वाच्छादकशक्तये।
सर्वभक्ष्याय सर्वाय नमस्ते सर्ववेदिने ॥18॥

सभी में सर्वत्र अन्तर्व्याप्त रूप वाले, सर्वत्र आच्छादिका-स्रोतोरूप शक्ति से सम्पन्न, सभी का अपने में संहरण करने वाले, सर्वज्ञ तथा सर्वरूप के लिए नमस्कार हो।

रम्याय वल्लभाक्रान्त-देहार्धाय विनोदिने।
नमः प्रपन्नदुष्प्राप्यसौभाग्यफलदायिने ॥19॥

रमणीय, अर्धनारीश्वर, विनोदी तथा शरणागत भक्तों की कठिनाई से प्राप्त होने वाले भोग-मोक्षात्मक सौभाग्य के दाता भगवान् स्वच्छन्दनाथ के लिए नमस्कार हो।

तन्महेशाय तत्त्वार्थ-वेदिने भवभेदिने।
महाभैरवनाथाय भक्तिगम्याय ते नमः ॥20॥

विद्या और अविद्यारूप उभयविध तत्त्व के वास्तविक अर्थ के वेत्ता, बार-बार के जन्म-मरण रूप बन्धन को नष्ट करने वाले, समावेशरसानुविद्ध व्यापारशालिनी भक्ति से ज्ञेय तथा महेश्वर उन महाभैरवनाथ के लिए नमस्कार हो।

शक्ति-गर्भप्रवोधाय शरण्यायाशरीरिणे।
शान्ति-पुष्ट्यादि-साध्यार्थ-साधकाय नमोऽस्तु ते ॥21॥

प्रकाश-विमर्शरूप, अशरीरी, शुद्धचिदेकरूप, शरणागतरक्षक तथा शान्तिपुष्टि आदि कर्मों के साधक के लिए नमस्कार हो।

रवत्कुण्डलिनी-गर्भ-प्रबोधप्राप्तशक्तये।
उत्स्फोटनापटुप्रौढपरमाक्षरमूर्तये ॥22॥

उन्निद्र कुण्डलिनी के अन्तःप्रबोध से सामर्थ्यशाली तथा विश्व-विस्तार में पटु एवं प्रौढ़, परमाक्षररूप के लिए नमस्कार हो।

समस्तव्यस्तसङ्ग्रस्त-रश्मिजालोदरात्मने।
नमस्तुभ्यं महामीनरूपिणे विश्वगर्भिणे ॥23॥

समस्त और व्यस्तरूप रश्मिजालमय शक्तिसमूह को आत्मसात करने वाले तथा जलरूप विश्व को अपने अन्तर में धारण करने वाले महामीनरूप हे परमात्मा, आपके लिए नमस्कार हो।

*(**विशेष**–जैसे जड़ जल में चेतन मत्स्य विचरण करता है, तो उससे वह जड़ जल भी चेतन प्रतीत होता है, उसी प्रकार चेतन परमात्मा के जड़ जगत् में व्याप्त होने के कारण जगत् भी चेतन प्रतीत होता है।)*

रेवारणिसमुद्भूत-वह्निज्वालावभासिने।
घनीभूतविकल्पात्मविश्वबन्धविलापिने ॥24॥
भोगिनीस्यन्दनारूढ़ि-प्रौढिमालब्ध-गर्विणे।
नमस्ते सर्वभक्ष्याय परमामृत-लाभिने ॥25॥

रेवा-शक्तिरूप अरणि से उद्भूत वह्निज्वालाओं द्वारा भासित, घनीभूत, विकल्परूप विश्वबन्धन को नष्ट करने वाले, कुण्डलिनी शक्ति के रथ पर आरूढ़ होने से प्राप्त प्रौढ़ता से पूर्ण, शिरःस्थित चन्द्रमा से विभूषित तथा सभी को आत्मसात करने वाले भगवान बहुरूप के लिए नमस्कार हो।

नफ-कोटिसमावेश-भरिताखिलसृष्ट्ये।
नमः शक्तिशरीराय कोटिद्वितयसङ्गिने ॥26॥

न–आदि से **फ**–अन्त (अर्थात् न-प-फ) वर्णरूप मालिनी के आवेश से पूर्ण होकर सकल सृष्टि की रचना करने वाले, शक्ति-युक्त हे अर्धनारीश्वरमय शरीरधारी आपके लिए नमस्कार हो।

महामोहमलाक्रान्तजीववर्गविबोधिने।
महेश्वराय जगतां नमोऽकारणबन्धवे[1] ॥27॥

महामोहात्मकमल से व्याप्त जीववर्ग को ज्ञानदान के द्वारा प्रबुद्ध बनानेवाले तथा प्राणिमात्र के अकारण-बन्धु अथवा जगत के कारणरूप, ब्रह्मादि-शिवान्त सभी को विभिन्न ऐश्वर्य प्रदान करके उनका परम उपकार करने वाले महेश्वर–शिव के लिए नमस्कार हो ॥27॥

1. तमःकारणबन्धवे–इत्यपि पाठः।

स्तेनोन्मूलनदक्षैक-स्मृतये विश्वमूर्तये।
नमस्तेऽस्तु महादेवनाम्ने पर-स्वधात्मने ॥28॥

केवल स्मरण से ही विघ्नरूप चोरों का उन्मूलन करने वाले, परामृतरूप एवं विश्वमूर्ति भगवान् महादेव के लिए नमस्कार है ॥28॥

रुग्द्राविणे महावीर्यरुरुवंश-विनाशिने।
रुद्राय द्राविताशेषबन्धनाय नमो नमः ॥29॥

रोगों अथवा मलों के निवारक, महान् पराक्रमी, विकल्पों के वंश के विनाशक तथा अशेष बन्धनों को नष्ट करने वाले भगवान रुद्र के लिए बार-बार नमस्कार हो।

द्रवत्-पर-रसास्वाद-चर्वणोद्यत-शक्तये।
नमस्त्रिदश-पूज्याय सर्वकारण-हेतवे ॥30॥

द्रवित होते हुए परमरस-परामृत के आस्वादन में सदा तत्पर ऐसी शक्ति वाले, त्रि-दशविध चररूप रहस्यद्रव्यों से पूज्य अथवा देवताओं से पूज्य तथा समस्त कारणों से भी कारणभूत उस परमात्मा के लिए नमस्कार हो।

रूपातीत नमस्तुभ्यं, नमस्ते बहुरूपिणे।
त्र्यम्बकाय त्रिधामान्तश्चारिणे चित्रचक्षुषे ॥31॥

हे रूपातीत! आपके लिए नमस्कार हो। ज्ञानादि तीन अम्बिका शक्तियों से उपास्य, सूर्य, चन्द्र और अग्निरूप धामत्रय के अधिष्ठाता एवं आश्चर्यरूप नेत्रों वाले बहुरूप प्रभो आपके लिए नमस्कार हो।

पेशलोपाय लभ्याय भक्तिभाजां महात्मनाम्।
दुर्लभाय मलाक्रान्तचेतसां तु नमो नमः ॥32॥

भक्तियुक्त महापुरुषों के लिए प्राणायामादि कष्टसाध्य उपायों के बिना ही सरल शाम्भव-शक्त्यादि उपायों से साक्षात्करणीय तथा आणव-मायीय स्वरूप घोर मलों से आक्रान्त चित्त वाले मनुष्यों के लिए दुर्लभ उस परमात्मा के लिए बार-बार नमस्कार हो।

भव-प्रदाय दुष्टानां भवाय भव-भेदिने।
भव्यानां त्वन्मयानां[1] तु सर्वदाय नमोनमः ॥33॥

दुष्टों को सांसारिक बन्धनों से कष्ट भोगने के लिए जन्म देने वाले, भव्यजनों को बन्धनमुक्त कराने के लिए जन्म-मरण से मुक्त करने वाले तथा भगवद् भक्ति-परायण, उत्तम मार्गानुयायी, मुमुक्षुओं को सर्वज्ञत्व एवं सर्वकर्तृत्वरूप परमैश्वर्य की अभिव्यक्ति से सर्वस्व प्रदान करने वाले भगवान

1. पाठांतर—तमःकारणबन्धवे

बहुरूप के लिए बार-बार नमस्कार हो।

अणूनां मुक्तये घोर-घोर-संसार-दायिने।
घोरातिघोर-मूढानां, तिरस्कर्त्रे नमो नमः ॥34॥

बद्ध आत्माओं की मुक्ति के लिए अत्यन्त घोर संसार विषय-वासना में लिप्तावस्था को देने वाले अथवा मुक्ति हेतु संसार (बार-बार जन्म लेने की स्थिति) का खण्डन करने वाले तथा घोर, अतिघोर एवं मूढ़ अथवा राजस, अतिराजस तथा तामसभाव के विनाशक परमात्मा के लिए बार-बार नमस्कार हो।

सर्वकारण-कलाप-कल्पितोल्लास-सङ्कुल-समाधिविष्टराम्।
हार्द-कोकनद-संस्थितामपि, तां प्रणौमि शिववल्लभामजाम् ॥35॥

साधकों के हृदयस्थल में स्थित होते हुए भी ब्रह्मादि सर्वकारण-समूह से कल्पित उल्लासजन्य स्वात्म-चमत्काररूप आनन्द से परिपूर्ण समाधि वाले शिव का आसन ही जिसका विश्राम स्थान है, उस उत्पत्ति-रहित 'अजा', आनन्दरूपा, शिव-वल्लभा-'शक्ति-सुन्दरी' को मैं प्रणाम करता हूं ॥35॥

सर्वजन्तुहृदयाब्ज-मण्डलोद्भूत-भाव-मधु-पान-लम्पटाम्।
वर्णभेद-विभवान्तर-स्थितां, तां प्रणौमि शिवल्लभामजाम् ॥36॥

समस्त ब्रह्मादि-स्थावरान्त जन्तु जिसके हृदय-कमल-मण्डलों में निरन्तर स्पन्दन होने से उत्पन्न, विविध विचित्र विकल्पात्मक भावरूप मधु के पान में तत्पर तथा अकारादि-हकारान्त वर्णों के भेदरूप ऐश्वर्य में व्याप्त रहने वाली मातृकारूपिणी उस शिववल्लभा अजा को मैं प्रणाम करता हूं।

इत्येवं स्तोत्रराजेशं, महाभैरव-भाषितम्।
योगिनीनां परं सारं, न दद्याद्यस्य कस्यचित् ॥37॥

इस प्रकार यह महान् स्तोत्रराज महाभैरव द्वारा कहा गया है। यह योगिनियों का परम सार है, यह स्तोत्र जिस किसी को नहीं देना चाहिए।

अदीक्षिते शठे क्रूरे, निःसत्त्वे शुचि-वर्जिते।
नास्तिके च खले मूर्खे, प्रमत्ते विप्लुतौजसे ॥38॥
गुरु-शास्त्र-सदाचार-दूषके कलह-प्रिये।
निन्दके जम्भके क्षुद्रे, समयघ्ने च दाम्भिके ॥39॥
दाक्षिण्य-रहिते पापे, धर्म्महीने च गर्विते।
भक्तियुक्ते प्रदातव्यं, न देयं पर-दीक्षिते ॥40॥

जिसने दीक्षा प्राप्त नहीं की हो और जो मायावी क्रूर, मिथ्याभाषी, अपवित्र, नास्तिक, दुष्ट, मूर्ख, प्रमादी, शिथिलाचारी, गुरु, शास्त्र तथा सदाचार

1. 'तन्मयानाम्'—इत्यपि पाठः

के निन्दक, कलहकारी, दोषदर्शी, आलसी, क्षुद्र, सम्प्रदाय-विच्छेदक अथवा प्रतिज्ञा-भंग करने वाले, अभिमानी, अविनयी, पापी, धर्महीन अपने को बड़ा मानने वाला तथा जो अन्य सम्प्रदाय में दीक्षित हो, उसे भी यह स्तोत्रराज नहीं देना। यह भगवान स्वच्छन्द भैरव में भक्ति रखने वाले को ही देना चाहिए।

पशूनां सन्निधौ देवि! नोच्चार्यं सर्वथा क्वचित्।
अस्मैव स्मृतभात्रस्य, विघ्ना नश्यन्ति सर्वतः ॥41॥

आचारशून्य पशुओं के समक्ष कहीं भी—कदापि इस स्तोत्र का उच्चारण नहीं करना चाहिए। जो साधक उपर्युक्त दोषों से रहित होकर इस स्तोत्र का पाठ करता है, उसके स्मरणमात्र से ही सब दोष-विघ्न नष्ट हो जाते हैं।

गुह्यका यातुधानाश्च, वेताला राक्षसादयः।
डाकिन्यश्च पिशाचाश्च, क्रूरसत्त्वाश्च पूतनाः ॥42॥
नश्यन्ति सर्वे पठित-स्तोत्रस्यास्य प्रभावतः।
खेचरी भूचरी चैव, डाकिनी शाकिनी तथा ॥43॥

यक्ष, राक्षस, वेताल, अन्य दानवादि, डाकिनियां, पिशाच, क्रूर-स्वभाव वाली पूतनादि राक्षसियां, आकाश तथा भूतल पर विचरण करने वाली, डाकिनियां और शाकिनियां ये सभी इस स्तोत्र के पठनमात्र के प्रभाव से नष्ट हो जाते हैं।

ये चान्ये बहुधा भूता, दुष्ट-सत्त्वा भयानकाः।
व्याधि-दुर्भिक्ष-दौर्भाग्य-मारी-मोह-विषादयः ॥44॥
गज-व्याघ्रादये दुष्टाः पलायन्ते दिशोदश।
सर्वे दुष्टाः प्रणश्यन्ति, चेत्याज्ञा पारमेश्वरी ॥45॥

इनके अतिरिक्त जो भी अतिदुष्ट जीव हैं तथा रोग, दुर्भिक्ष, दौर्भाग्य, महामारी, मोह, विषप्रयोग, गज, व्याघ्र आदि दुष्ट पशु हैं, वे सभी दसों दिशाओं में भाग जाते हैं। सभी दुष्ट नष्ट हो जाते हैं। ऐसी परमेश्वर की आज्ञा है।

अपराधक्षमापनस्तोत्रम्[1]

गुरोः सेवां त्यक्त्वा गुरुवचनशक्तोऽपि न भवे,
भवत्पूजा–ध्यानाज्जप-हवन-यागाद्विरहितः।
त्वदर्च्चानिर्माणे क्वचिदपि न यत्नं च कृतवान्,
जगज्जालग्रस्तो झटिति कुरु हार्द मयि विभो ॥1॥

प्रभो दुर्गासूनो तव शरणतां सोऽधिगतवान्-
कृपालो दुःखार्तः कमपि भवदन्यं प्रकथये।
सुहृत् सम्पत् तेऽहं सरल-विरलः साधकजन–
स्त्वदन्यः कस्त्राता भवदहन-दाहं शमयति ॥2॥

वदान्यो मान्यस्त्वं विविश्र-जनपालो भवसि वै,
दयालुर्दीनार्तान् भव-जलधिपारं गमयसि।
अतस्त्वत्तो याचे नति-नियमतोऽकिञ्चनधनः,
सदा भूयाद् भावः पद नलिनयोस्ते तिमिरहा ॥3॥

अजापूर्वो विप्रो मिल-पदपरो योऽतिपतितो,
महामूर्खो दुष्टो वृजिन-निरतः पामर-नृपः।
असत्यानासक्तो यवन-युवतीव्रात-रमणः,
प्रभावात् त्वन्नाम्नः परम-पदवीं सोऽप्यधिगतः ॥4॥

दयां दीर्घां दीने बटुक कुरु विश्वम्भर! मयि,
न चान्यःसन्त्राता परमशिव मां पालय विभो।
महाश्चर्यं प्राप्तस्तव सरलदृष्ट्या विरहितः,
कृपा-पूर्णैर्नेत्रैः कमल-दल-तुल्यैरवतु माम् ॥5॥

---

1. श्रीभैरव नामावली पाठ, जप, दीपदान आदि किसी भी विधि की पूर्ति के पश्चात् इस स्तोत्र का पाठ करना चाहिए। इससे त्रुटियों का अपराध क्षमा हो जाता है तथा कृपा प्राप्त होती है।

सहस्ये किं हंसो नहि तपति दीनं जलमयं,
घनान्ते किं चन्द्रोऽसमकर-निपातो भुवितले।
कृपादृष्टेस्तेऽहं भयहर विभो किं विरहितो,
जले वा हर्म्ये वा घनरस-सुपातो न विषमः ॥6॥

त्रिमूर्त्तिस्त्वं गीतो हरिहर-विधातात्मक-गुणो,
निराकरः शुद्धः परतरपरः सोऽप्यविषयः।
दयारूपं शान्तं मुनिगणनुतं भक्तदयितं,
कदा पश्यामि त्वां कुटिलकचशोभित्रिनयनम् ॥7॥

तपो योगं साङ्ख्यं यमनियमचेतःप्रयजनं
न कौलार्च्चा-चक्रं हरिहरविधीनां प्रियतमम्।
न जाने ते भक्तिं परममुनिमार्ग मधुविधिं,
तथाप्येषा वाणी परिरटति नित्यं तव यशः ॥8॥

न मे काङ्क्षा धर्मे न वसु-निचये राज्यनिवहे,
न मे स्त्रीणां भोगे सखिसुतकुटुम्बेषु न च मे।
यदा यद्यद्भाव्यं भवतु भगवन् पूर्वसुकृतान्,
ममैतत्तु प्रार्थ्यं तव विमलभक्तिः प्रभवतात् ॥9॥

कियांस्तेऽस्मद्भारः पतितपतितांस्तारयसि भो,
मदन्यः कः पापी यजनविमुखः पाठरहितः।
दृढो मे विश्वासस्तव नियतिरुद्धारविषया,
सदा स्याद्विश्रम्भः क्वचिदपि मृषा मा च भवतात् ॥10॥

भवद्भावाभिन्नो व्यसन-निरतः को मदपरो,
मदान्धः पापात्मा बटुकशिव ते नामरहितः।
उदारात्मन् बन्धो नहि तवक-तुल्यः कलुषहा,
पुनः सञ्चिन्त्यैवं कुरु हृदि यथा चेच्छसि तथा ॥11॥

जपान्ते स्नानान्ते ह्युषसि च निशीथे पठति यो,
महत्सौख्यं देवो वितरति तु तस्मै प्रमुदितः।
अहोरात्रे पार्श्वे परिवसति भक्तानुगमनो,
वयोऽन्ते संहृष्टः परिनयति भक्तान् स्वभुवनम् ॥12॥

इति श्रीसिद्धयोगीश्वरश्रीघनैयालालशिष्येणात्मारामेण रचितं श्रीबटुकप्रार्थनापराधक्षमापनस्तोत्रं समाप्तम्।

॥शुभमस्तु॥

हमारे महत्वपूर्ण संग्रहणीय प्रकाशन

1.	तंत्र दर्शन	पं. गोविन्द शास्त्री	200.00 रु.
2.	साधना और संस्कार	पं. गोविन्द शास्त्री	150.00 रु.
3.	प्रायोगिक तंत्र	पं. गोविन्द शास्त्री	100.00 रु.
4.	अंकदर्शन	पं. गोविन्द शास्त्री	60.00 रु.
5.	तंत्र विद्या का यथार्थ	पं. दुर्गाप्रसाद शुक्ल	200.00 रु.
6.	आपका हाथ-आपका सच्चा मित्र	पं. दुर्गाप्रसाद शुक्ल	125.00 रु.
7.	द्वादश भाव रहस्य	पं. दुर्गाप्रसाद शुक्ल	80.00 रु.
8.	शनि : कब शुभ-कब अशुभ	पं. दुर्गाप्रसाद शुक्ल	100.00 रु.
9.	मंगल : कब शुभ-कब अशुभ	पं. दुर्गाप्रसाद शुक्ल	80.00 रु.
10.	राहु-केतु : कब शुभ-कब अशुभ	पं. दुर्गाप्रसाद शुक्ल	60.00 रु.
11.	ग्रहों का काम-भाव पर प्रभाव	पं. दुर्गाप्रसाद शुक्ल	95.00 रु.
12.	रत्न प्रश्नोत्तरी	पं. दुर्गाप्रसाद शुक्ल	150.00 रु.
13.	ज्योतिष कौमुदी (नक्षत्र खंड)	पं. दुर्गाप्रसाद शुक्ल	200.00 रु.
14.	अंकोदया (अंक-ज्योतिष)	इंजी. हरीश श्रीवास्तव	70.00 रु.
15.	श्री बटुक भैरव साधना	डॉ. रुद्रदेव त्रिपाठी	100.00 रु.
16.	भूतविद्या (अदृश्य रहस्यों की कुंजी)	डॉ.एम.यू.बहादुर	100.00 रु.
17.	पुत्र प्राप्ति के अचूक उपाय	डॉ. भुवनेश्वर प्रसाद वर्मा	40.00 रु.
18.	श्री महामृत्युंजय पूजा विधान	आचार्य अशोक सहजानन्द	100.00 रु.
19.	ग्रह शांति दीपिका	आचार्य अशोक सहजानन्द	200.00 रु.
20.	आपकी समस्या-हमारा समाधान (सैट)	आचार्य अशोक सहजानन्द	200.00 रु.
21.	दुर्गा सप्तशती वैभवम्	आचार्य अशोक सहजानन्द	200.00 रु.
22.	वास्तुशास्त्र, फेंगशुई, पिरामिड सार-संग्रह	आचार्य अशोक सहजानन्द	150.00 रु.
23.	सिद्ध मंत्र संग्रह	आचार्य अशोक सहजानन्द	150.00 रु.
24.	महामंत्र णमोकार: वैज्ञानिक अन्वेषण	डॉ. आर. के. जैन	100.00 रु.
25.	आत्मा का वैभव.	दर्शन लाड़	100.00 रु.
26.	णाणसायर (ज्ञान सागर) सैट	कुसुम जैन	300.00 रु.
27.	अरिहंत पूजांजलि	कुसुम जैन	45.00 रु.
28.	पूजन पाठ सार्थ	कुसुम जैन	12.00 रु.
29.	जैन गीता	आचार्य विद्यासागर	20.00 रु.
30.	इतिहास के अनावृत पृष्ठ	आचार्य सुशील कुमार	20.00 रु.
31.	गोविन्द उवाच	मध्यम पुरुष	20.00 रु.
32.	संस्कृत साहित्य का सुबोध इतिहास	डॉ. जे.पी.खंडेलवाल	300.00 रु.
33.	वैदिक साहित्य : नवमूल्यांकन	डॉ. रसिक विहारी जोशी	450.00 रु.
34.	संस्कृत-प्राकृत का समानांतर अध्ययन	डॉ. श्रीरंजन सूरिदेव	200.00 रु.
35.	त्रिषष्टिशालाका पुरुष चरितम्	आचा ' हेमचंद	650.00 रु.

36.	सहजानंद वर्णी और उनकी संस्कृत रचनाएं	कुसुम जैन	450.00 रु.
37.	सप्तसंधान महाकाव्य : समीक्षात्मक अध्ययन	डॉ. श्रेयांस कुमार	300.00 रु.
38.	आयुर्वेद द्वारा संपूर्ण स्वास्थ्य	डॉ. गोविंद उपाध्याय	150.00 रु.
39.	स्वास्थ्य और सौंदर्य रक्षा	डॉ. कोमलचंद्र	60.00 रु.
40.	सफलता-असफलता/चुनाव आपका	पं. दुर्गाप्रसाद शुक्ल	40.00 रु.
41.	इंटरव्यू में सफलता कैसे?	निधि आर. लाल	40.00 रु.
42.	विश्व साहित्य की झाँकियां	डॉ. जगदीश चंद्र जैन	200.00 रु.
43.	मध्यप्रदेश के प्राचीन कीर्तिस्थल	डॉ. रामनारायण 'मधुर'	200.00 रु.
44.	भारतीय संस्कृति और कला के विविध आयाम	डॉ. रामनारायण 'मधुर'	100.00 रु.
45.	सार्थक समाधान क्यों नहीं?	गंगा प्रसाद मिश्र	80.00 रु.
46.	अयोध्या की ओर (संस्मरण)	द्वारका लाल 'गुप्त'	80.00 रु.
47.	Jaina Astronomy	Dr. S.S. Lishk	Rs. 400.00
48.	Secrets of Face Reading	Dr. S.S. Lishk	Rs. 20.00
49.	Astrological Talks	Dr. S.S. Lishk	Rs. 30.00
50.	Tao of Jain Sciences	Prof. L.C. Jain	Rs. 500.00
51.	Meru Temples of Angkour	Dr. J.D. Jain	Rs. 200.00
52.	Ancient Geography of Ayodhya	Dr. S.N. Pandey	Rs. 200.00
53.	Introduction to Mythology	L. Spence	Rs. 400.00
54.	Jain & Hindu Logic: Compretive Study	Dr. P.K. Jain	Rs. 400.00
55.	Jaina way of Life	Dr. P.K. Jain	Rs. 350.00
56.	Ancient Republic of Bharat	Dr. R.C. Jain	Rs. 450.00
57.	Daulatram's Chhahdhala (Jain Bible)	Dr. S.C. Jain	Rs. 70.00
58.	Yogindu's Yogsaar	Dasrath Jain	Rs. 200.00
59.	Prominent Jaina Eulogies	Dasrath Jain	Rs. 600.00
60.	Enhance Your Word- Power	Anvita Agarwal	Rs. 80.00

आवश्यक सूचना

प्रत्येक आर्डर पर अपना नाम व पूरा पता पिन कोड के साथ लिखना न भूलें। पुस्तकें पूरा मूल्य अग्गिम प्राप्त होने पर ही भेजी जाती है। 200रु. से कम के आदेश पर रु. 20 रु. डाक शुल्क मिलाकर भेजें। पुस्तकें रजिस्टर्ड डाक से भेजी जायेगी। ज्योतिष, तंत्र-मंत्र-यंत्र के अनेकों दुर्लभ ग्रंथ, फोटोस्टेट रूप में उपलब्ध कराये जा सकते हैं। आपको किसी भी पुस्तक की आवश्यकता हो, हमें सूचित करो। हमारे यहां अनेक प्रकाशकों की पुस्तकों का बहुत बड़ा स्टाक उपलब्ध रहता है। इसके अतिरिक्त हमारे यहां से सभी प्रकार के यंत्र, मालाएं, पूजन सामग्री, ऋद्धि-सिद्धि देने वाली प्रभावशाली वस्तुएं, फेंगशुई एवं पिरामिड, रत्न आदि उपलब्ध कराये जा सकते हैं। विस्तृत सूचनार्थ लिखे-

मेघ प्रकाशन

239, दरीबा कलां, दिल्ली-110006 ● दूरभाष : 23278761, 55278761



आप भी अनुभव कर रहे होंगे, हमारा जीवन असुरक्षित होता जा रहा है, दानवी क्रूरता ने भय का पाश-जाल बिछा दिया है, जिसमें प्रत्येक जन उलझ-फंस गया है। हमारी आत्मरति परहंता की सीमा तक विकृत हो चुकी है, व्यक्ति मन से निर्बल और तन से निःसत्व होकर ऐसा जीवन जी रहा है जो उसकी विवशता अथवा मृत्यु की प्रतीक्षा मात्र बन गया है।

इसका कारण है?

- हमारा आस्थाहीन जीवन दर्शन
- मूल्यहीन सामाजिक चेतना
- नीतिशून्य राजनतिक चरित्र
- लक्ष्यहीन शिक्षा

और इनके समाधान/सफल मार्गदर्शन के प्रतीक रूप में

सहज-आनन्द (पत्रिका)

सहज-आनन्द ?

- एक विचार यज्ञ है, जिसके सुवासित धूम से आपका मन-मंदिर-सा पवित्र हो जाएगा।
- एक शुभ संकल्प है जो समाज को आस्थावान बनाएगा।
- एक इंद्रधनुषी स्वप्न है जिसका प्रत्येक रंग आपको सहज विश्वास से अनुप्राणित व उल्लसित करता रहेगा।
- एक सुदृढ़ प्रयास है जो भौतिक विज्ञान की चमक से हतप्रभ होते जा रहे देशीय गौरव को भास्वर रूप में स्थापित कर सकेगा।
- परिवार के प्रत्येक सदस्य के लिए रूचि सम्पन्न ज्ञानवर्द्धक, मनोरंजक, पठनीय सामग्री से परिपूर्ण एक सम्पूर्ण पत्रिका।

12 अंक - 300 रु. **आजीवन - 2100 रु.**

प्राप्ति स्थान :

मेघ प्रकाशन

239, दरीवाकलां, दिल्ली-110006

दूरभाष - 23278761, 55278761

ई-मेल : **megh-prakashan @ rediffmail.com**

श्री बटुक भैरव साधना

आचार्य अशोक सहजानन्द